**आरण्यकम्** मार्च 2003

अर्धवार्षिकं संस्कृतशोधपत्रम् आर० एन० आई० सं० 58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   – स्व० पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक' स्य भोजपुरी-पद्यानुवादः)
   – श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्मभानवदर्शन' की मीमांसा
   – श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' –पं० जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) – स्व० भवानीदत्त पाण्डेयः
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधरणा – श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् – पं० व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) – स्व० पं० उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् – स्व० पण्डित उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् – स्व० पण्डित व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका – पं० जगदीश्वर प्रसाद मिश्र 'नलिन
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) – स्व० पण्डित वचन मिश्र.

# आरण्यकम्

## (अर्धवार्षिकं संस्कृतशोधपत्रम्)

### संस्कृतप्रसारपरिषद्
### आरा (बिहारः)

**मार्च 2003**

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित ‘स्टाम्प’-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च **डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्,** प्रकाशपुरी, आरा ( विहारः )-802301 इति सङ्केतेन विधेयम् ।

# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् – दशमम् अङ्कः – प्रथमः

चैत्रः, वि० सं० २०६०

मार्च, २००३

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

पण्डित वासुदेव द्विवेदी, वाराणसी
डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डॉ० हरिहर झा, दरभङ्गा
डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ० राय अश्विनी कुमारः, बोधगया


*संस्थापकः*

स्व० पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*

डॉ० गोपबन्धु मिश्रः

*सहसम्पादकः*

डॉ० सुनीलकुमार प्रधानः


*प्रकाशिका*

संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301
दूरभाषा - (06182) 224193

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।


# सम्पादकीयम्

सिद्धि-साध्य-सिद्ध-साधन-साधना-साधक इति परस्पर-सम्बद्धार्थवाचकाः केचन शब्दाः प्रवर्तन्ते । 'सिद्ध-साध्य' इति वस्तुनः धर्मं द्विधा विभज्य आचार्यः मम्मटभट्टः भणति-"सिद्धोऽपि द्विविधः-पदार्थस्य प्राणप्रदः विशेषाधानहेतुश्च । तत्राद्यो जातिः..........द्वितीयो गुणः । साध्यः पूर्वापरीभूतावपवः क्रियारूपः (काव्यप्रकाशे)।" किन्तु साधनाप्रसङ्गे साधकाः एतेन वस्तुधर्माख्यानेन सन्तुष्टाः न भवन्ति । तेषां कृते अखिलं जगत् केवलं साधनमस्ति, साध्यं नाम ब्रह्मत्वम् । अर्थात् लक्ष्यं न्यूनं संकीर्णं वा न, अपितु 'भूमैव सुखम्, नाल्पे सुखमस्ति' इति भावः राजेत । एतैः शरीरवाङ्मनोभिः अखिलैः साधनैः तादृशं बृहत् साध्यम् अवाप्तव्यं चेत् तत्र महती अविचलिता साधना अपेक्ष्यते । स्वकर्मणा तस्य परमात्मनः अभ्यर्चनां विधायैव तादृशीं सिद्धिं कश्चित् प्राप्तुं शक्नोति ।

यथाऽऽह श्रीभगवान् गीतायाम् –

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।। (१८/४६)

परन्तु स्वकर्मद्वारा तदर्चनाप्रसङ्गे, संक्षेपेण 'साधना'प्रसङ्गे वा, बहवः शत्रवः बाधकाः वा भवन्ति । गीतायां ते 'कामः क्रोधस्तथा लोभः' इति नरकस्य त्रिविधद्वाररूपेण, श्रीदुर्गासप्तशत्यां मधुकैटभाद्यसुररूपेण अथवा अन्यत्र रामायणादौ खरदूषणादिराक्षसरूपेण वर्णिताः सन्ति । बाधायां नष्टायां सत्यामेव अभीष्टसिद्धये मार्गः सुकरः भवति । अत एव सर्वविधभारतीयपूजापद्धतौ सर्वादौ विघ्नविनाशकस्य पूजनं क्रियते ।

आरण्यकस्याऽस्मिन्नङ्के प्रच्छन्नरूपेण अस्माकं शरीरेषु एव वसताम् अभ्यसूयकानाम् अमरत्वविनाशकानाम् अमरारीणां गीतोक्त-दर्प-

डॉ० गोपबन्धु मिश्रः
सम्पादकः

दम्भाभिमानक्रोधपारुष्यादीनाम् आसुरसम्पत्तिस्वरूपाणां श्रीदुर्गासप्तशत्यां विविधैः महिषादिभिः असुररूपैः सह कीदृशी सङ्गतिः अस्ति इति लेखविशेषः प्रवर्तते। भौतिके संसारे एते अस्माकं शत्रवः ऊह्याः विनाश्याश्च इत्यत्र लक्ष्यं स्पष्टमस्ति। एतेषामपरिचयादेव कश्चित् अमेरिकादेशः इराक-देशम् आक्रामति, कश्चित् देशः प्रतिवेशिनि देशे आतङ्कवादं प्रसार्य जनान् घातयति, कश्चित् परपीडनेन आत्मतृप्तिमवाप्नोति इत्येतादृशाः अनर्थाः भवन्ति। वयम् अनर्थान् तान् दूरीकृत्य मानवं जीवनं सार्थकं महत् च साधयितुं यत्नं कुर्यामैव।

'मधुपर्णी' इति कवितासंग्रहस्य समीक्षाऽत्र स्थानम् अवाप्तवती। नवीनग्रन्थानां रचनया तथा च विविधाधुनिकशैलीभिः काव्यादिप्रणयनेन संस्कृतसाहित्यं न केवलम् आधुनिकताम् अवाप्नोति अपि तु इतरभाषागतैः साहित्यैः सह एतस्य सामयिकता सुतरां सङ्गच्छते।

आरण्यकस्य प्रकाशनं गते वर्षे कतिपयैः कारणैः अनियमितं जातम्। इदानीम् एतत् नियतकालेन प्राकाश्यमागच्छति, अग्रेऽपि नियतकालिकता अस्य अनुवर्तेत इति अस्माकं कृते प्रसन्नतायाः विषयः। शिष्टा अखिला साधना विदुषाम् आ परितोषाद् एव।

*विद्वद्वनतः*

मार्च 2003

**गोपबन्धु मिश्रः**

सम्पादकः

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | साधनासमरस्य शत्रवः | डॉ० इन्दुमती पाठकः<br>भूगोलविभागाध्यक्षा<br>महाराजा महाविद्यालयः, आरा<br>अनुवादकः<br>डॉ० हरिशङ्करमणि त्रिपाठी<br>संस्कृत शिक्षकः, ज्ञाननिकेतनम्, पटना | १ |
| 2. | कालिदासस्य जलविज्ञानम् | डॉ० गोपबन्धु मिश्रः<br>उपाचार्यः, संस्कृतविभागः<br>वी. कुँ. सिंह वि. वि., आरा | ९ |
| 3. | 'उपेन्द्रविज्ञानदर्शने' सत्त्वम् | तरुणा सिंहः<br>यू. जी. सी. अनुदेशिका<br>सरलसंस्कृतसम्भाषणकेन्द्रम्<br>सहजानन्द ब्रह्मर्षि महाविद्यालयः, आरा | १७ |
| 4. | संस्कृतप्रसारपरिषद्, आरा संक्षिप्तम् इतिवृत्तम् | | २४ |
| 5. | ऋग्वेदे नेतृविमर्शः | डॉ० सुनीलकुमार प्रधानः<br>संस्कृतशिक्षकः, ज्ञाननिकेतनम्<br>बेलीरोड, पटना | २५ |

| | | |
|---|---|---|
| 6. वाल्मीकीयरामायणस्य बालकाण्डे क्तप्रत्ययान्तशब्दानां प्रयोगवैविध्यम् | कुमारी निवेदिता<br>शोधच्छात्रा (संस्कृतम्)<br>वी. कुँ. सिंह वि. वि., आरा | २९ |
| 7. मधुपर्णी (पुस्तकसमीक्षा) | प्रणेता – प्रो० मिश्रोऽभिराजराजेन्द्रः<br>कुलपतिः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी<br>समीक्षकः – डॉ० सुनीलकुमार प्रधानः | ३९ |
| परिशिष्टम्<br>संस्कृतसौरभसञ्चयनम् (षष्ठं पुष्पम्)<br>बालभक्तः प्रह्लादः | प्रणेता – पण्डित व्रजभूषण मिश्र 'आक्रान्तः'<br>सम्पादकः – डॉ० गोपबन्धु मिश्रः | |


❖

# साधनासमरस्य शत्रवः


डॉ० इन्दुमती पाठकः


अनुवादकः डॉ० हरिशङ्करमणि त्रिपाठी


जीवनम् एकः निरन्तरयात्राप्रवाहः अस्ति । ब्रह्मभावे लयः एव एतस्य लक्ष्यम् । यदा मानवः स्वस्य तत् लक्ष्यं निकषा आगच्छति तदा आनन्दातिरेकेण निगदितुम् उत्सहते–'ब्रह्मैवाहं सर्ववेदान्तवेद्यम्'। न केवलम् एतत्, इतोऽपि अग्रेसरः भूत्वा सः स्वीकरोति "सर्वं खल्विदं ब्रह्म ।"[1] परन्तु एतस्य सत्यस्य अनुभवं कुर्वाणाः विरला एव भवन्ति । जीवत्वात् देवत्वम्, देवत्वात् ईश्वरत्वम्, ईश्वरत्वात् ब्रह्मत्वम् इति जीवत्वात् ब्रह्मत्वं यावत् यात्रा सामान्यतः प्रथमसोपाने (जीवत्वात् देवत्वं यावत्) एव परिसमाप्यते । अथवा बलियूपे बद्धानां पशूनाम् इव अस्माकं शरीरधारिणां प्राणाः प्रथमचक्रे एव समाप्तिं गच्छन्ति । ब्रह्माण्डान्तर्गताः सर्वे पदार्थाः एकं वर्तुलं निर्मान्ति । संसारः स्वयम् एकः वर्तुलः अस्ति । वयं संसारिणः उपर्युक्तानां त्रयाणां संकेन्द्रीयाणां वर्तुलानां मध्ये सर्वतः बहिर्गते वर्तुले विद्यमानाः सन्तः जीवभावमेव आचरन्तः यावज्जीवनं चक्रवत् भ्रमन्तः एव भवामः । शरीरस्य अन्तःपुरे विद्यमानयोः देवत्व-ईश्वरत्व इत्यनयोः वर्तुलयोः उपरि मनः, प्राणाः ज्ञानं चेति शक्तित्रितयस्य सहायतया योगारूढाः भूत्वा उत्क्षेपिताः भवितुं शक्नुमः । अन्ततः ईश्वर्याख्यया शक्त्या ऐश्वर्यं प्राप्य ब्रह्मकेन्द्रं यावत् प्राप्तुं शक्नुमः । परन्तु एतत् उत्क्षेपणं सरलं नास्ति । तैलधारवत् साधनया कठोरेण श्रमेण एव एतत् सम्भाव्यते । अत एव जीवनम् एकः संग्रामः समरः वेति कथ्यते । वस्तुतः जीवनम् एकः सततविकासः एका निरन्तरसाधना वास्ति । परमज्योतिषः दर्शनं कृत्वा

ज्योतिःस्फुलिङ्गरूपेण रूपान्तरलाभः एव साध्यः, तद्यथा-गीतायाम्–

**ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।**
**ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥**

उपरिकथितं संकेन्द्रीयवर्तुलत्रयम् एवंविधमस्ति–




गीतायाम् उपरिकथितस्य परमज्योतिषः स्थितिः ब्रह्मकेन्द्रे एवास्ति । तत एव केन्द्रापसारिणः बलस्य कारणेन बाह्यवर्तुलं यावत् आगत्य वयं जीवभावं प्राप्तवन्तः स्मः । इदानीं केवलं दिशः परिवर्तनं केन्द्राभिसारित्वं च अपेक्ष्यते । अर्थात् यस्मात् आगताः तत्र पुनः प्राप्तव्यम् । किन्तु सागरस्य जलं वाष्पीभूय गिरिप्रान्तरेषु वर्षदपि किं सरलतया पुनः सागरं प्राप्नोति ? नहि । गिरिगह्वराणि तत् जलं बध्नन्ति । उत्तुङ्गशिखरात् समतलभूमौ निर्भयं तस्य कूर्दनमपेक्ष्यते । ततः परं पथिषु विविधबाधकैः सह तस्य न केवलं समरः भवति अपितु जलं तान् बाधकानपि स्वप्रवाहे आत्मसात् करोति । ततः एव क्लान्तां श्रान्तां च नदीं (नदीजलं वा) समुद्रः सोत्साहम् आत्मनि आकारयति ।

एतादृश एव भवति जीवनस्य साधनासमरः । अस्मिन् समरे अर्थात् जीवभावात् ब्रह्मभावं प्रति प्रत्यावर्त्तनप्रसङ्गे अनेके असुराः बाधकाः वा पुरतः आपतन्ति । के एते असुराः ? एते सर्वे बहिर्मुखिनो भावस्य प्रसाराः । एतेषां नित्यम् अपसरणं संसारं प्रति भवत्येव । दुर्गासप्तशत्याम् एतेषाम् असुराणाम् अतीव सुन्दरं सार्थकं च वर्णनम् अस्ति । सप्तशत्यां



एतेषु असुरेषु त्रयः प्रमुखाः सन्ति–(१) मधुकैटभौ, (२) महिषासुरः, (३) शुम्भः निशुम्भश्च । शिष्टाः असुराः एतेषां सहायकाः सन्ति । तद्यथा-चिक्षुरः, चामरः उदग्रः, महाहनुः, असिलोमा, बाष्कलः, बिड़ालः, परिवारितः च महिषासुरस्य सहायकाः असुराः । तथैव धूम्रलोचनः, चण्डमुण्डौ, रक्तबीजश्च शुम्भनिशुम्भयोः सहायकाः सन्ति ।

सप्तशत्याः प्रथमाध्याये मधुकैटभयोः दैत्ययोः वर्णनमस्ति । एतौ 'विष्णुकर्णमलोद्भूतौ'[3] स्तः । श्रवणं कर्णेन्द्रियस्य गुणः । एतस्य गुणस्य आन्तरिकम् अभिसरणम् 'अनाहतनाद'–श्रवणस्य सामर्थ्यं जनयति । किन्तु एतस्य बाह्यम् अपसरणं सांसारिकश्रवणम् उपनयति । बाह्यं श्रवणं द्विविधम्–कर्णप्रियं कर्णकटु च । तत्र कर्णप्रियं श्रवणमेव 'मधु'दैत्यः अस्ति । प्रशंसावचनानां श्रवणम् अस्मान् मादमति, तेन मुखेन मधुः अस्मान् पराजयते । इदानीन्तने काले एतदेव मिथ्याश्लाघा चाटुकारिता वा अस्ति । एतादृशानां अलीकप्रशंसावचनानां प्रभावेण वयम् उचितानुचितबोधं विस्मरामः । कर्णकटु श्रवणं 'कैटभ'दैत्य एव । एतस्य स्पर्शमात्रेण अस्माकम् अहंकारः विषधर इव फूत्करोति । कामं कटुशब्दाः कटुकौषधवत् अस्माकं हितं साधयन्ति, किन्तु एतेषां स्वीकरणमेव अस्माकं कृते कठिनमेव । अतः उभाभ्यां दैत्याभ्याम् आविष्टा वयं तुष्टाः अथवा रुष्टाः सन्तः आत्मनः अहितमेव साधयामः एवं च आगामिनः कर्मणः बीजं वपामः । तस्य बीजस्य विपाकेन कर्माशयः निर्मीयते तेन व अस्माकं प्रारब्धमपि निश्चीयते । तदा वयं गीतायाः सहजमुपदेशमिमं विस्मरामः–

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।**[4]

एतयोः दैत्ययोः पराभवः परमब्रह्मरूपेण सिद्धायाः 'चित्'शक्तेः जागरणेन सम्भाव्यते । एषा चित्-शक्तिः माता त्रिपुरसुन्दरी वा का ? अस्माकं पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि तथा च मनः इति एकादशरुद्राणां या सत्त्वरजस्तमोगुणरूपा त्रिविधाः शक्तयः सन्ति तासाम् एकीकृतं तेजःपुञ्जमेव एषा चित्-शक्तिरस्ति । तद्यथा आह गोस्वामितुलसीदासः श्रीरामचरितमानसे –

पद बिनु चलै सुनै बिन काना ।
कर बिना कर्म करै विधि नाना ॥

तथा च –

अपादापि वाताधिकं धावसि त्वं
श्रुतिभ्यां विहीनापि शब्दं शृणोषि ।
अनासापि जिघ्रस्यनेत्रापि पश्य –
स्यजिह्वापि नानारसस्वादविज्ञा ॥[5]

एषा एव सर्वदेवमयी ज्योतिष्मती अमृतस्वरूपा भगवती अस्ति। एतस्याः जागरणेन उद्भूतस्य अखण्डस्य चिन्मयस्य ज्योतिषः प्रकाशनेन एव महिषासुरं घातयितुं शक्यते । महिषासुरेण सह मातुः चण्डिकायाः समरस्य वर्णनं तृतीयेऽध्याये अस्ति । महिषासुरः रजोगुणस्य बाह्यप्रसारोऽस्ति। एषः उत्कटा विषयाकाङ्क्षा, मार्गे समागतबाधया आहतः अहङ्कारः तथा च तज्जन्यः क्रोधः एवास्ति । एषः महीं प्रति उन्मुखानां वृत्तीनां मूर्त्तरूपमस्ति। अतएव एषः अन्तर्मुखिनः अमरपदस्य प्राप्तौ विरोधी अस्ति, तेन च अमरारिपदवाच्योऽस्ति । सांसारिकविषयभोगोन्मुखी वृत्तिरेव महिषासुरोऽस्ति। सांसारिकविषयभोगः विषतुल्यः भवत्येव, तस्य ध्यानमात्रेण –

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधो विजायते ।
क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥[6]

महिषासुरस्य सेनापतिः 'चिक्षुरः' आसक्तिजन्यः विक्षेपः अस्ति, यतो हि विक्षेपार्थक-'चिक्ष्' धातोः अयं शब्दो निष्पन्नः । अपरोऽसुरः 'चामरः' आवरणशक्तिरस्ति । मोहान्धविक्षेपस्य कारणेन वयं ज्योतिष्मत्याः विमुखाः भवामः । पुनश्च कदाचित् सत्यज्ञानं किञ्चिन्मात्रम् अवशिष्टं तिष्ठत्यपि चेत् चामरः तस्योपरि आवरणं पातयति । तदा वयं मणिधराः सर्पाः इव अशक्ताः भवामः । अमृतपुत्राः सन्तोऽपि मरणधर्माणः भवामः। राजराजेश्वर्याः त्रिपुरसुन्दर्याः आत्मजाः भूत्वाऽपि यायावराः इव मधुकरिपात्रम्



आदाय विक्षिप्ताः सन्तः इतस्ततः धावामः । चिक्षुरचामरयोः निकटे क्लेशः, कर्म, विपाकः आशय इति चतुरङ्गिण्यः सेनाः सन्ति–

महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ।
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥[7]

अपरो दैत्यः 'उदग्रः' अन्नमय-प्राणमय-मनोमय-ज्ञानमय-विज्ञानमय-आनन्दमयेति षड्भिः कोषैः युक्तः देहाभिमानोऽस्ति, अतोऽयं षड्भिः अयुतैः सैन्यैः युक्त इति सप्तशती आह –

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥[8]

गर्वोन्नतेन मस्तकेन युक्तोऽयम् उदग्रः साक्षात् अभिमानः एव । 'महाहनुः' असुरः शारीरिक्याः मानसिक्याः च शक्तेः दर्पः, कर्तृत्वभावस्य दम्भो वा अस्ति । 'असिलोमा' असुरः द्वेषोऽस्ति । स्वस्य असितुल्येन लोम्ना एषः अपरं पीडयति । अद्यतनं यत् पीडादायकं वचनं जनानां स्वभावो जायमानमस्ति, तदेव एषोऽसुरः। सांसारिकसकलवासना 'बाष्कल' नाम्नि असुरे समाहिता दृश्यते । एषा वासना जायते, अस्ति, विपरिमते, वर्धते, अपक्षीयते, विनश्यति इति[9] षड्भिः भावविकारैः युक्ता भवति इत्यतः एषोऽसुरः 'अयुतानां शतैः षड्भिः बाष्कलो युयुधे रणे'[10] इत्युक्तम्। 'बिडालः' असुरः भेदबुद्धिरस्ति । बिडालः इव स्वार्थवशात् अपरेषां दोषदर्शने सहस्रलोचना वयं स्वचेतनामेव कलुषितां कुर्वाणाः पराभूताः भवामः । कथितं चाऽस्ति –

देहस्था देवता सर्वा देहस्थश्च महासुरः ।
देहस्थानि च तीर्थानि पश्यन्ति योगचक्षुषः ॥

पारिवारस्य भरणपोषणार्थं शुभाशुभविचारं परित्यज्य जना यत् उचितेन अनुचितेन वा उपायेन धनार्जनं कुर्वन्ति तदेव 'परिवारितः' असुरः। एतस्य प्रभावेण आत्मकल्याणस्य प्रसङ्गं न चिन्तयन्ति जनाः ।

एते सर्वे असुराः अभितः असूयन्ति इति 'अभ्यसूयक' पदवाच्याः सन्ति ।

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥[11]

एतेषामसुराणां पराभवः आत्मसमर्पणेन शक्यते । सर्वे देवा यदा सकलाः शक्तीः समर्पयन्ति तदा असुराणां विनाशाय मातुः जगदम्बायाः आविर्भावो भवति । गीतायामपि श्रीभगवान् उवाच –

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।[12]

रजोगुणस्य नाश एव महिषासुरस्य वधः । रजोगुणस्य नाशेन सह तमोगुणस्य क्षयोऽपि भवति । तथापि अस्माभिः आत्मतत्त्वं न उपलभ्यते, जीवभावः पूर्णतः परिष्कृतो न भवति, द्वद्वश्च न अपगच्छति, तस्य अस्मिता वर्तमाना भवत्येव ।

सप्तशत्याः चतुर्थाध्याये देवीस्तुतेः तथा च पञ्चमाध्यायस्य पूर्वार्धे देवीसूक्तस्य पश्चात् शुम्भनिशुम्भयोः उल्लेखोऽस्ति । धूम्रलोचनादयः तयोः अनुचराः । वस्तुतः ब्रह्मभावे लयः एव जीवभावस्य परमपरिणतिः । तस्य निकटे एव सोऽहम् इति भाव उदेति । किन्तु 'सोऽहम्' इत्यत्र अस्मिता तिष्ठत्येव । महिषासुरस्य नाशेन सह देहाभिमानस्तु नश्यति, किन्तु स्वस्य अस्मिता नाऽपगच्छति । तदापि पिण्डब्रह्माण्डयोः द्वन्द्वः तिष्ठत्येव । 'यत् पिण्डे तद् ब्रह्माण्डे' इत्युक्त्वा वयं स्व-अहंतायाः प्रचारं कुर्वन्तो भवामः–'अहं' ब्रह्मसदृशः, 'अहं' ब्रह्मणः अंशविशेषः इत्यादि । तदा 'अहं' तथा च 'स' इत्यनयोः भेदः वर्तते । एषः एव शुम्भदैत्यस्य अत्याचारः । एतया अस्मितया सह ममत्वबोधरूपी निशुम्भोऽपि तिष्ठति । मम आत्मा, मम पुण्यम्, मम सत्कर्म-इत्येतादृशः विपर्ययः भवत्येव । यद्यपि आत्मतत्त्वस्य खण्डः न भवति तथापि वयं खण्डं खण्डम् आत्मानं पश्यामः तथा च स्वभावानुरूपं तस्य उपधीन् निर्मामः । एतस्य भावस्य पुष्टिः अस्माकं धूम्राच्छन्नदृष्टिजन्येन विपर्ययज्ञानेन अविद्यया वा भवति । स्वस्य आत्मा निष्कलुषं ज्योतिः इव लक्ष्यते, किन्तु अपरः आत्मा कालुष्यपूर्णः दृश्यते । शुम्भनिशुम्भौ पाप-पुण्ये, शुभाशुभे, स्वपरौ इति द्वन्द्वरूपौ लक्ष्येयाताम् । यत्र एतादृश. द्वन्द्वः तत्र प्रवृत्ति-निवृत्तिजन्याः



द्वैतक्रियाः भविष्यन्त्येव । एतावेव चण्डमुण्डौ असुरौ । यदि ब्रह्मतत्त्वं केन्द्रगतं बिन्दुरूपं तर्हि द्वैतस्थितिः कथं सम्भाव्येत ? तथा च यावत् द्वैतभावः यावच्च एतेषाम् असुराणां सन्तापः तावत् ब्रह्मचैतन्यं कथम् उपलभ्येत । उक्तं चाऽस्ति –

ब्रह्मविद् ब्रह्मैव भवति ।

अतः एतान् असुरान् पराजित्य एव ब्रह्मचैतन्यं प्राप्तुं शक्यते ।

'रक्तबीज' इत्याख्यस्य असुरस्य उपाख्यानं विना जीवनसमरस्य असुराणां कथा पूर्णा न भवति । अस्माकम् अनन्ताः कामनाः एव 'रक्तबीजः'। सत्त्वस्य कामनाऽपि कामना एव । रक्तबीजः रक्तात् जायते । जीवनमेव एतद् रक्तम् । रक्तजन्यः जीवभावो भवति । पृथ्वीतले पतन् एव रक्तबिन्दुः रक्तबीजम् उत्पादयति । जीवस्य पार्थिवसुखस्य नित्यनूतनलालसानामेव एषा कथा । यावत् एषः जीवभावापन्नः रक्तबीजः जीवति तावत् अस्मिता ममत्वं च बलं लभेते । रक्तबीजस्य विनाशात् अनन्तरमेव शुम्भनिशुम्भयोः पातः भवति । तदा एव –

ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद् दिवाकरः ।
जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥[13]

अस्मितायाः अभिघातेन शरीरस्थं तेजस्तत्त्वं शान्तं भवति, आत्मज्योतिः निर्वाता निष्कम्पा दीपशिखा इव ज्वलति । आत्मा स्वस्य शुद्धतमं गुणातीतं च रूपं प्राप्य परमात्मनि परिणतो भवति । द्वैतभावो नश्यति । अद्वैतभावे उदिते अखण्डस्य आनन्दस्वरूपस्य कूटस्थस्य सत्यस्य साक्षात्कारः संभवति । तत्र 'नेति नेति' इत्येतदतिरिच्य नान्यः शब्दो भवति –

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥[14]

सर्वत्र ब्रह्म एव, ब्रह्म विना किमपि नास्ति । एतदेव परमानन्दरूपं सांख्यस्य 'पुरुषः', वेदान्तस्य 'ब्रह्म', उपनिषदः 'आत्मा', गीतायाः 'श्रीकृष्णः', दुर्गासप्तशत्याः 'चण्डिका' वाऽस्ति । एतामवस्थां प्राप्य साधको निगदति –

सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ।

सन्दर्भसूची :-

1. छान्दोग्योपनिषद्, 3/14/1
2. श्रीमद्भगवद्गीता, 13/17
3. दुर्गासप्तशती, 1/68
4. श्रीमद्भगवद्गीता, 2/38
5. कालीस्तवमञ्जरी, सुधाधारास्तोत्रम्
6. श्रीमद्भगवद्गीता, 2/62, 63
7. दुर्गासप्तशती, 2/40,41
8. दुर्गासप्तशती, 2/41
9. निरुक्तम्, यास्कः, 1/3/2
10. दुर्गासप्तशती, 2/43
11. श्रीमद्भगवद्गीता, 16/18
12. श्रीमद्भगवद्गीता, 18/66
13. दुर्गासप्तशती, 10/31-32
14. श्रीमद्भगवद्गीता, 4/24

❖



# कालिदासस्य जलविज्ञानम्

डॉ० गोपबन्धु मिश्रः

जीवने अनिवार्याऽऽवश्यकतात्रयमस्ति – (१) वायुः, (२) जलम्, (३) वनस्पतयः च । एतेषु जलं वायुश्चेति तत्त्वद्वयम् अजेयम् । परन्तु वनस्पतौ किमपि वैशिष्ट्यमस्ति । वनस्पतिः जैवः चेतनायुक्तश्च । वनस्पतेः विकासो भवति । तदर्थं वनस्पतयः वायुमण्डलात् अङ्गारकाम्लं (कार्बन-डाई-अकसाइड), जलात् हाईड्राजन, सूर्यप्रकाशाच्च शक्तिम् आहरन्ति, क्रमशः विकसन्ति च । अतः जलं विना वनस्पतयः नैव सम्भाव्यन्ते, वनस्पतिं विना कस्यापि भोजनं न, भोजनं विना जीवनं च न सम्भाव्यते ।

न केवलं जीवनार्थं जलम् आवश्यकम्, अपितु जीवनस्य अस्तित्वं संरक्षितुम् एतस्य महती आवश्यकता वर्त्तते । पशूनां वनस्पतीनां च शरीरं जलेन पूर्णमस्ति । मानवशरीरस्य प्रायः सप्ततिः प्रतिशतं जलमेव । शरीरस्य प्रत्येकं कोशिका अन्तः बहिश्च जलपूर्णा एव । प्रत्येकं सजीवायाः कोशिकायाः नवतिः प्रतिशतं जलमेव । अस्माकं प्रत्येकं दिवसस्य भोजने तण्डुल-गोधूम-सूप-शर्करा-शाक-आदयः वनस्पतिभ्यः आगताः भवन्ति । ते च वनस्पतयः स्वविकासार्थं भूमेः सहस्र-सहस्रलीटरपरिमितानि जलानि आहरन्ति । अर्थात् वयं यावत् जलं पेयजल-चाय-काफी-इत्यादिमुखेन स्वीकुर्मः, ततः अनेकसहस्रगुणं जलं वयं स्वभोजनमुखेन प्राप्नुमः । अतः जलम् अस्माकं कृते अतीव आवश्यकम् अस्ति ।

भारतीयवाङ्मये जलस्य महत्त्वं प्रदर्शयन्त्यः बहुविधाः सूक्तयः प्रवर्त्तन्ते । वैदिकयुगे जलस्य देवरूपत्वं स्वीकृतमासीत् । तत्र 'आपो देव्यः' इति जलस्य वर्णनं कृतं विद्यते । अथर्ववेदेऽपि (पैपल्लादसंहिता

1.1.1) 'शं नो देवीरभिष्टय आपो भवन्तु पीतये शं यो रभिस्तवन्तु नः' इति स्तुतिः प्रथते । अद्यापि विविधेषु संस्कारेषु 'आपो हि ष्ठा मयो भुवः' इत्यादयः वैदिका मन्त्राः जलस्य सम्बोधनरूपेण व्यवह्रियन्ते ।

भारतीयजीवने जलस्य वैशिष्ट्यं सर्वत्र दृश्यते । तीर्थेषु सर्वेषु संस्कारेषु आचारेषु च जलमेव परमावश्यकं महाभूतं प्रतीयते । ज्ञानेन सहापि जलस्य संयोजनं प्रथितं विद्यते । शिक्षां प्राप्ताः छात्राः 'स्नातकाः' कथ्यन्ते । अथेदं प्रतीयते यत् शिक्षासमाप्तेः अनन्तरं तेषां स्नानम् अभिषेको वा तीर्थजलैः कार्यते स्म, येन ते विधिवत् स्नाताः स्नातका वा सम्बोध्यन्ते स्म ।

कविकुलगुरुः कालिदासः स्वरचनासु भारतीयसंस्कृतेः मौलिकसिद्धान्तानां स्थावरजङ्गमनिर्विशेषेण जीवनाधायकतत्त्वानां च सम्यक् विवेचनं कृतवानस्ति । नियतिकृतनियमरहितं काव्यं रचयन्नपि महाकविः काव्यगततत्त्वानां नियतिविहितनियमान् वैज्ञानिकतां वा सम्यक् परिपालयति । जन्ममृत्युजरादयः प्राणिनां दशाविशेषाः भवन्तु अथवा मनो-बुद्धिविषयकं सूक्ष्मतत्त्वं भवतु, अथवा भूमि-जलादिभौतिकतत्त्वानि सन्तु-एतेषां मौलिकं वैज्ञानिकं वा स्वरूपं विविधेषु प्रसङ्गेषु महाकविना यथा स्पष्टं कृतं तथा कविसामान्येन अन्येन केनापि कर्तुमशक्यमिव आसीत् ।

महाकविः जलतत्त्वविषयकेषु कथनेषु जलस्य विविधं वैज्ञानिकं सारभूतं वा महत्त्वम् उपस्थापितवान् । जलस्य उत्पत्तिः, उपलब्धिस्थलम्, उपयोगिता, जीवनाधायकता, सुरक्षा इत्यादिषु विषयेषु सूक्ष्मतया स्थूलतया वा महाकवेः उपस्थापनं तस्य व्यापकदृष्टिं मानवकल्याणकारिप्रवृत्तिं च संपोषयति ।

## (क) स्रष्टुः आद्या सृष्टिः जलम्

पृथिव्यां जैविकतत्त्वानां सृष्टेः प्राक् जलस्य सृष्टिः जाता, ततः विकासक्रमेण प्राणिनः सृष्टा इति आधुनिकं विज्ञानं मनुते । चन्द्रादौ पृथिवीतरे स्थले यत्र जलं नास्ति तत्र जैविकी प्रक्रियाऽपि नास्ति इति निश्चप्रचम् । एतस्मिन् विषये 'अप एव ससर्जादौ' इति वैदिकं विचारं पुरस्कृत्य भारतीय-अवतारवादपरिकल्पनायां "प्रलयपयोधिजले धृतवानसि वेदम्"[१] इत्याद्युक्तौ आदिकाले प्रलयकाले वा पयोधिजलस्य सत्ता पुष्टा वर्त्तते । महाकविः कालिदासः एतस्मिन् विषये स्पष्टम् अभिव्यनक्ति – "या सृष्टिः स्रष्टुराद्या"[२] इति । अर्थात् जलमेव स्रष्टुः आद्या सृष्टिः, एतदेव जगदीशस्य आद्यं प्रत्यक्षं शरीरम् । कविनाऽत्र जलं सामान्य-भौतिकतत्त्वरूपेण विमृष्टमस्ति । कुमारसम्भवस्य द्वितीयसर्गेऽपि देवैः जलमेव सर्वप्रथमं सृजतः ब्रह्मणः स्तुतिः विधीयते –

यदमोघमपामन्तरूपं बीजमज त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥[३]

## (ख) जलचक्रम्, तदाधारौ सूर्यः समुद्रश्च

जलं न केवलं धरायां तिष्ठति वहति वा, अपि तु प्राणिजीवनचक्रवत् तस्यापि जीवनचक्रं चलतीति विज्ञायते । जलचक्रमिदं सूर्येण चाल्यते । एतस्याऽयं क्रमः –

१. समुद्रात् जलस्य वाष्पीकरणम्, २. पृथिव्यां सागरे च वृष्टिरूपेण हिमरूपेण वा जलस्य पतनम्, ३. नदीनां मुखेन पृथिवीतः जलस्य समुद्रं प्रति गमनम् ।

मेघदूते "धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः"[४] इति वदन् कविः मेघस्य निर्माणविषये वैज्ञानिकं तथ्यमेव प्रस्तौति । कविः जानाति यत् सूर्यस्य प्रखरतापेन समुद्रस्य जलं वाष्पीभूय स्वलवणांशं परित्यज्य मेघरूपेण परिणमति । रघुवंशे समुद्रवर्णनप्रसङ्गे सूर्यकिरणाः समुद्रात् जलमादाय यथा मेघरूपं गर्भं धारयन्ति तथेदमुच्यते –

"गर्भं दधत्यर्कमरीचयोऽस्मात् ।"[५]

अनुकूलः पवनः मेघरूपं जलं प्रेरयति, तद्यथा –

"मन्दं मन्दं नुदति पवनश्चानुकूलः ।"[६]

घनारण्येषु उत्तुङ्गपर्वतेषु च मेघस्य साहचर्येण ऊर्ध्वं प्रवहन् आर्द्रः वायुः संघनीक्रियते, ततश्च वर्षा भवतीति नैसर्गिकी स्थितिः । एष वृष्टिक्रमः घने विशाले अरण्ये, उच्चे पर्वते च सहजतरः इति स्वाभाविकीं स्थितिं विज्ञाय कविः पर्वतशिखरेण सह मेघस्य प्रगाढां मैत्रीं वर्णयति –

"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम् ।"[७]

"अद्रेः शृङ्गं हरति पवनः किंस्वित् ।"[८]

जलस्य इदं वाष्पीकरणं संघनीकरणेन वृष्टिरूपं चेति जलचक्रं दृष्टान्तरूपेण प्रस्तौति कविः –

"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।"[९]

नदीजलानामपि वाष्पीकरणं भवतीति कवेर्वचनमिदं प्रमाणम् –

"रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ।"[१०]

## (ग) नदीमातृका देशाः, तदुपायाश्च

पृथिव्यां जलस्य त्रिविधं रूपं प्राप्यते – १. वाष्पः (वायौ), २. द्रवः (समुद्रे ह्रदे नद्यां च), ३. घनीभूतम् (हिमनदीषु) । महाकविः सर्वविधं जलं सम्यक् जानाति । धूमज्योतिःसलिलमरुतां सन्निपातं मेघरूपं जलं तु जानात्येव, द्रवरूपेण अखिलव्यवहारगतं तत्र च विशिष्टतया नदीगतं जलमपि सम्यक् परिचिनोति । हिमालयाद् उद्गताः नदीः प्रशंसन् अङ्गिरा ऋषिः नदीः एव आर्यावर्त्तस्य आधाररूपेण वर्णयति –

"चराचराणां भूतानां कुक्षिराधारतां गतः ।"[११]

नदी स्वस्याः जलेन देशस्य प्रदूषणं दूरीकरोति, सेचनद्वारा कृषिकार्यं पोषयति, धार्मिककृत्यानि सम्पादयितुम् उत्कृष्टसाधनत्वेन आत्मानं निर्वर्तयतीति नद्याः मातृवत् आचरणं समीक्षते महाकविः कालिदासः –

"सेयं मदीया जननीव तेन
मान्येन राज्ञा सरयूर्विमुक्ता ।"[१२]

नदीजलं शुद्धं दूषणरहितं स्वास्थ्यप्रदमेव स्यात् इति महाकवेः अभिप्रायः विविधैः वचनैः सिध्यति । कुमारसंभवे जलं पार्वत्याः स्नानविधये उपयुक्तमस्ति न वा इति प्रश्नः[१३] तथा च रघुवंशे सन्ध्यातर्पणादिधार्मिककृत्येभ्यः नदीजलम् उपयोगि अस्ति न वेति रघुं प्रति ऋषेः कौत्सस्य प्रश्नः[१४] अत्र प्रमाणम् ।

नदीजलानां स्वच्छतया तेषां कल्याणकारिता सम्भाव्यते इति कवेरभिप्रायः अत्र स्पष्टीभवति ।



मन्दाकिनीनदीं भूमेः कण्ठगतां मुक्तावलीमिव वर्णयता कविना नदीजलानां प्रदूषणराहित्येन स्वच्छतया च सुतरां कल्याणकारिता सम्भाव्यते इति भावः स्पष्टीकृतोऽस्ति, तद्यथा –

एषा प्रसन्नस्तिमितप्रवाहा
सरिद् विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ।।[१५]

रघुवंशे ह्रदजलानां प्रसन्नता स्वच्छता वा इष्यते कविना, तद्यथा –

"ह्रदाः प्रसन्ना इव गूढनक्राः ।"[१६]

## (घ) वृष्टिकारी मेघः, मेघसृष्टिः वर्षणाऽऽनुकूल्यं च

वाष्परूपेण ऊर्ध्वं गच्छत् जलं मेघरूपं दधाति । तच्च एकस्मात् स्थानात् स्थानान्तरं प्रति ऊर्ध्वम् अधश्च गतिशीलं भवति । पुनः शीतलतायाः कारणेन घनीभूय वर्षतीति नैसर्गिकः क्रमः । "त्वामारूढं पवनपदवीम्"[१७] इति गतिशीलं मेघं दर्शयता कविना पुष्करावर्तकादिमेघानाम्[१८] अधिकवृष्टिकारिता विज्ञाता आसीत् । वृष्टिजलं सृष्टिसाधकं स्थावराणां जङ्गमानां च सन्तापहरम्[१९] इति मतं बहुशः कविना पोषितमस्ति । कृषिप्रधाने देशेऽस्माकं कृषिः मूलतः वर्षाजलाश्रित इति मत्वा कविः वृष्टेः समयानुसारम् आनुकूल्यं विमृशति, तद्यथा –

"त्वय्यायत्तं कृषिफलम् ।"[२०]

घनारण्येषु मेघगतजलस्य संघनीकरणं सरलतरमित्यतः वनस्पतीनां व्यापकरक्षया संवर्धनेन च वृष्टेः अनुकूलता आगन्तुं शक्नोतीति संकेतितं कविना –

"वान्तवृष्टि–
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।"[२१] जलवर्षणेन वनलतादयः पशुपक्षिणः मानवाश्चेति जगतः सर्वाणि अङ्गानि न केवलम् उल्लसितानि भवन्ति अपि तु तेषां शरीरेषु आकर्षकं परिवर्त्तनं भवति । बलाकानां गर्भाधानम्,[२२] हंसानां मानसयात्रा,[२३] पथिकानां गृहप्रत्यावर्त्तनम्,[२४]

वनोपप्लवप्रशमनम्'[२५] नदीनां जलापूर्तिः इत्यादिबहुविधपरिवर्त्तनकालः वृष्टिकारिणः मेघस्य आगमनेन सिध्यतीति साधयित्वा कविः वर्षणेन वर्षर्तुना च सन्नद्धं कृषिविज्ञानं समाजतत्त्वं च सम्यक् विमृष्टवानस्ति ।

वहन्ति वर्षन्ति नदन्ति भान्ति
रुदन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः ।।[२६]

इत्यत्र वर्षाकालस्य महती उपयोगिता आकर्षणीयता चोररीकृता विद्यते ।

जलेन न केवलं भूपृष्ठगताः मानवादयः उपकृताः भवन्ति, अपि तु शुद्धेन जलेन अगणिताः जलजन्तवः श्वसन्ति, लसन्ति चेति महाकवेः स्पष्टम् अभिमतम् अस्ति । कुमारसम्भवे भस्मीभूतं पतिं कामदेवं वीक्ष्य आत्मप्राणत्यागतत्परां रतिं प्रति जीवनदायिनी शून्यवाणी तथैव आसीत् यथा अकस्मात् वृष्टिजलस्य प्रथमबिन्दवः शुष्कतडागस्य व्याकुलमत्स्यानां कृते प्राणदायकाः भवन्ति –

"शफरी ह्रदशोषविक्लवां
प्रथमा वृष्टिरिवान्वकम्पयत् ।"[२७]

अभिज्ञानशाकुन्तले महिषादीनां सानन्दं निपानजलेषु उत्खननं निष्पीडनं च,[२८] रघुवंशस्य त्रयोदशसर्गे समुद्रवर्णनप्रसङ्गे जलजन्तूनां वर्णनम्, नवमसर्गे गृहदीर्घिकायां मदकलोदकलोलविहङ्गमानां वर्णनम्[२९] इत्यादिप्रसङ्गाः कवेः जलविषयिकां व्यापकदृष्टिं पोषयन्ति ।

जलं जीवनमिति स्पष्टं भारतीयं मतं महाकवेः जलविषयिण्या श्रद्धया स्पष्टतरं भवति । रघुवंशे सरयूनदी कोसलदेशस्य सर्वेषां राज्ञां धात्रीरूपेण वर्ण्यते, सुमन्त्रेण पूज्यते च –

"सामान्यधात्रीमिव मानसं मे
संभावयत्युत्तरकोसलानाम् ।"[३०]

शाकुन्तले शचीतीर्थे सलिलं वन्दमानायाः शकुन्तलायाः अङ्गुलीयकं तज्जले प्रभ्रष्टम् ।[३१]'



वर्षाभावसमये सेचितजलस्यापि महत्त्वं भूयो दर्शयति महाकविः । पार्वत्या स्वयं जलसेचनेन संवर्धिताः वृक्षाः अनन्तरं संजातात् तस्याः ज्येष्ठपुत्रात् कुमारादपि अधिकं स्निग्धाः जाताः ।[३२] रघुवंशे वृक्षकान् जलेन अभिषेक्तुं वाल्मीकिः सीतां प्रेरयति ।[३३] तत्रैव प्रथमसर्गे वसिष्ठाश्रमे ऋषिकन्याभिः कृतं जलसेचनं वर्णितमस्ति ।[३४] शाकुन्तले सखीभिः सह शकुन्तला सहोदरान् इव आश्रमवृक्षान् जलेन सिञ्चति संवर्धयति च ।[३५]

**निष्कर्षः**

अनेन प्रकारेण जलस्य, जलचक्रस्य, जलाशयानां जलसेचनस्य च वैविध्येन महत्त्वं वर्णयता महाकविना जीवनरूपस्यास्य जलस्य प्रदूषणं सर्वथा तिरस्क्रियते । रघुवंशस्य चतुर्थसर्गे रघोः सैनिकैः हस्तिभिः च मथितम् अतः प्रदूषितं कावेरीनद्यां जलं दृष्ट्वा व्यथमानः कविराह –

"स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरी सरितां पत्युः शङ्कनीयामिवाकरोत् ।।[३६]

अतः जलसंसाधनं सर्वथा संरक्षणीयम् इति कवेरभिप्रायः सुस्पष्टो भवति ।

**सन्दर्भसूची**

१. जयदेवः, गीतगोविन्दम्, दशावतारस्तोत्रम्
२. अभिज्ञानशाकुन्तलम् (अ.शा.), १/१
३. कुमारसम्भवम् (कु.सं.), २/५
४. मेघदूतम् (मेघ.), पूर्वमेघः (पूर्व.),५
५. रघुवंशम् (रघु.), १३/४
६. मेघ., पूर्व० ९
७. तथा १२
८. तथा १४
९. रघु. १/१८
१०. कु.सं. ४/४४
११. कु.सं. ६/६७

१२. रघु. १३/६३
१३. कु.सं. ५/३३
१४. रघु. ५/८, 'शिवानि वस्तीर्थजलानि कच्चित्'
१५. रघु. १३/४८
१६. रघु. ७/३०
१७. मेघ., पूर्व० ८
१८. तथा ६
१९. तथा ७, 'सन्तप्तानां त्वमसि शरणम्'
२०. तथा १६
२१. तथा २०
२२. मेघ, पूर्व ९
२३. तथा ११
२४. तथा ८
२५. तथा १७
२६. ऋतुसंहारम्, प्रावृड्वर्णनम् १९
२७. कु० सं० ४/३९
२८. अ० शा० २/६
३०. रघु० १३/६२
३१. अ० शा०, पञ्चमाङ्कः
३२. कु० सं० ५/१४
३३. रघु० १४/७८
३४. रघु० १/५१
३५. अ० शा०, अङ्कः प्रथमः
३६. रघु० ४/४५

❖



# 'उपेन्द्रविज्ञानदर्शने' सत्त्वम्

तरुणा सिंहः

विहारप्रान्तस्य 'पवना' ग्रामस्य निवासिना पण्डित उपेन्द्रदत्तशर्मणा विरचितं 'उपेन्द्रविज्ञानदर्शनम्' दर्शनशास्त्रे एकः अनन्यसाधारणः ग्रन्थः अस्ति । ग्रन्थस्य रचनाकालः १८५६ तमं वर्षमस्ति । एषः संस्कृतप्रसारपरिषद्, आरा द्वारा १९९९ तमे वर्षे प्रकाशितोऽस्ति । 'उपेन्द्रविज्ञानदर्शनम्' ग्रन्थस्य वैशिष्ट्यं नाम – ग्रन्थकारेण अस्मिन् ग्रन्थे विस्तारदृष्ट्या प्रायः दर्शनशास्त्रस्य सर्वेषां विषयाणां समावेशः कृतः अस्ति । इदानीन्तनकाले सामान्यतः दृश्यते – जनाः स्वरचितग्रन्थेष्वपि स्वमौलिकविचारं न उपस्थापयन्ति अपितु अन्येषां विदुषां मताधारेण एव ग्रन्थं रचयन्ति । परन्तु अस्मिन् ग्रन्थे कुत्रापि अन्यदर्शनशास्त्रस्य व्यासकपिलादीनामाचार्यवर्याणां मतानाम् अनुकरणं कृत्वा विषयाणामुल्लेखः न कृतः अस्ति । अतः एषः ग्रन्थकारस्य मौलिकः दर्शनसिद्धान्तग्रन्थः अस्ति । अत्र ग्रन्थकारेण ब्रह्मसूत्राणीव स्वचिन्तनेन १६५ सूत्राणि तथा च तेषां भाष्याण्यपि प्रणीतानि । ग्रन्थे अस्मिन् चत्वारः विभागाः सन्ति । १. उत्तमाधिकारः २. मध्यमाधिकारः ३. कनिष्ठाधिकारः ४. आत्मलक्षणम् ।

'उपेन्द्रविज्ञानदर्शन'स्य मुख्याधारः श्रीमद्भगवद्गीता प्रतीयते । अतः गीतायाः अपेक्षया उपेन्द्रविज्ञानदर्शने सत्त्वगुणस्य किं वैशिष्ट्यम् इति पक्षमुद्घाटयितुमेव अत्र मया समीक्षा क्रियते ।

प्रकृतेः सत्त्वरजस्तमः इति त्रयः गुणाः सन्ति । एतैः गुणैः एव जगतः प्रत्येकमपि वस्तु सम्बद्धं भवति । यद्यपि त्रयाणां गुणानां परस्परम्

अन्योन्याश्रयः सम्बन्धः अस्ति तथापि त्रिषु गुणेषु सत्त्वगुणस्य स्वरूपकथनं भिन्न-भिन्नप्रकारेण कृतमस्ति । श्रीमद्भगवद्गीतायां सत्त्वस्य स्वरूपमेवं निरूपितम् –

**सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्**[१]

सांख्यकारिकायां सत्त्वस्य लक्षणमेवं निरूपितम्–

**सत्त्वं लघु प्रकाशकमिष्टम्**[२]

उपेन्द्रविज्ञानदर्शनस्य मध्यमाधिकारे सत्त्वस्य स्वरूपमेवं निरूपितम्–

**येन विज्ञानं वर्द्धते तत्सत्त्वम् ।**

'येन विस्पष्टं ज्ञानं यद् यथा वर्त्तते तस्य तथैव ग्रहणं कर्त्तव्यमिति निरन्तरदृढाभ्यासेनोत्तरोत्तरं वर्द्धते तत् सत्त्वम् । येन आक्रम्यमाणे सदाकारं विज्ञानं परिणमते विषयतादात्म्ये प्राप्नोति तत् सत्त्वम् ।'[३]

अत्र इदमवधेयं यत् गीतायां सत्त्वस्य विषये उक्तम्–'सत्त्वं निर्मलत्वात् प्रकाशकं तथा च अनामयमस्ति । तत् मनुष्यं सुखसङ्गेन तथा च ज्ञानसङ्गेन बध्नाति । एवमेव सांख्येऽपि सत्त्वस्य स्वरूपं लघु तथा च प्रकाशकं भवति । उभयत्रापि सत्त्वं 'प्रकाशकम्' इति समानता दृश्यते । परञ्च उपेन्द्रविज्ञानदर्शने 'प्रकाशकम्' इति पदस्थले 'विज्ञानम्' इति पदं स्वीकृत्य ततोऽपि स्पष्टतया सत्त्वस्य स्वरूपं कथितम् । तर्हि सत्त्वस्य वर्द्धने सति किं भवति ? इति जिज्ञासायाम् उपेन्द्रदत्तेन कथितम्–'यथा सत्यमुपकरोति तथा सत्त्वमपि उपकरोति तथा च यथा असत्यमपकरोति तथा रजस्तमसी ।'[४] अतएव त्रयोदशसूत्रे कथितम्–

**सत्त्वं वर्धनीयं न रजस्तमसी**[५]

आचार्येण उपेन्द्रदत्तेन सूत्रस्य वृत्त्याम् इतोऽपि स्पष्टतया सत्त्वस्य स्वरूपं निरूपितम्–'अस्तीति सत्, सतो भावः सत्त्वम्, अन्वयव्यतिरेकाभ्यां विज्ञानसमृद्ध्या यद् यादृशं परिचीयते तत् सत्त्वम्, यद् विषयकं विज्ञानं विज्ञानान्तरेण कदापि बाधितुं न शक्यते तत् सत् । यत्र विशेष्यतामवगाहते तत् सत् । यत्र प्रकारता तत् सत्त्वम् ।'[६] अपरेभ्यः गुणेभ्यः सत्त्वगुणस्य



श्रेष्ठताप्रदर्शने तेनोक्तम्–'सतः चाञ्चल्यं रजः तथा च रजः ईषदावरणं तमः'।[७] परञ्च सत्त्वस्य विषये कथितम्–'प्रतिबन्धसामग्रीनिवर्त्तनेन यथावद् भावनीयम्'[८] अतः सत्त्वं वर्धनीयम् ।

## त्रयाणां गुणानां स्थितिः

उपेन्द्रविज्ञानदर्शने त्रयाणां गुणानां स्थितेः प्रदर्शने त्रीणि सूत्राणि उक्तानि । तत्र प्रथमं सत्त्वरजस्तमसामविभक्तावस्था प्रकृतिः इति निरूपणे कथितम्–

**आत्मनः स्फुरणं स्वभावो नित्यः प्रकृतिरित्याख्यायते ।**[९]

अत्र सांख्यदर्शनस्य प्रभावः प्रतीयते । यतो हि सांख्यदर्शने अपि एवमेव कथितम्–'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ।[१०] परञ्च उपेन्द्रविज्ञानदर्शने सा च अवस्था परमानन्दस्वरूपस्यात्मनः स्फुरणं स्वभावो नित्यः अस्ति । तथा च नित्यताकारणेन एव जगतः उत्पत्तिः तथा च विनाशः भवति । अतः एषा एव अवस्था 'प्रकृतिः' इति विद्वद्भिः आख्यायते ।

## सत्त्वस्य इतरगुणद्वयस्य उपरि प्रभावः

गीता आह –

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।**[११]

सांख्यकारिका आह –

**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ।**[१२]

एवमेव उपेन्द्रविज्ञानदर्शनस्य कनिष्ठाधिकारे उक्तम्–

**तीव्रोपासनया सा सत्त्वरजस्तमसामितरे शीघ्रमेवान्तर्दधाति ।**

अत्र प्रकृतिः पृथक्तया सत्त्वात्मिका प्रकृतिः, राजसी प्रकृतिः, तामसी प्रकृतिः इति रूपेण स्थित्वा अन्ये द्वे प्रकृती निगृह्णाति । तथा च निग्रहणं कृत्वा पुनः आत्मनि आवृणोति । यथा-सत्त्वात्मिका प्रकृतिः संशयविपर्ययादिप्रतिबन्धकनिवृत्त्या विवेकवैराग्यादिसाधनसम्पत्त्या निरन्तराबाधितोपास्यभावनया स्वसमृद्ध्या राजसीं तामसीं च सत्वरं सत्त्वेन

आवृणोति । एवमेव अन्ये द्वे प्रकृती अपि स्वस्वभावसमृद्ध्या अन्ये द्वे प्रकृती आच्छादयति इति उल्लिखितमस्ति ।[१३]

## सत्त्वस्य कार्यम्

सत्त्वगुणस्य कार्यविषये अन्यस्मिन् दर्शनग्रन्थे अपि निरूपितम्, परञ्च तत् अतिसंक्षिप्तमेवास्ति । गीतायाम् – सत्त्वं सुखे सञ्जयति[१४] तथा च सांख्यदर्शने–सत्त्वगुणस्य सुखं वा प्रीतिः वा कार्यं भवति[१५] इति कथितम् । उपेन्द्रविज्ञानदर्शने अस्मिन् विषये कथितम् –

**सत्त्वेनोपशाम्यति प्रसीदति च ।**

बहिर्मुखतयैव दुःखमुत्पद्यत इति सत आत्मनोऽन्यथाभावनानिवर्त्तनेन सत्त्वेनाविपरीतभावेनोपशाम्यति स्फुरणमात्मभावं प्राप्नोति, न तु जीवभावम्। तथाऽऽत्मसुखाविर्भावेन प्रसीदति । स्पृहानिवर्तनेन सन्तुष्यति च ।[१६]

गीतासांख्ययोः अपेक्षया सत्त्वगुणस्य कार्यम् अत्र स्पष्टं व्याख्यातमस्ति इति कथयितुं शक्यते ।

इत्थं सत्त्वगुणस्य सामान्यतः कार्यं कथितम् । इदानीम् एते त्रयोऽपि गुणाः जीवेषु यत् कार्यं सम्पादयन्ति तत् निरूपयन् आचार्यः उपेन्द्रदत्तः आह –

**एवं जीवाः सत्त्वेन विज्ञानं रजसोद्योगं तमसा मोहं वर्द्धयन्तोऽमरमनुजदनुजादिषूपजायन्ते ।**

'एवं यथा प्रकृतिस्त्रिविधा तथा सत्त्वेन यद्वस्तु, यादृशं तत्त्वेन विज्ञानं विषयविशिष्टं प्रमात्मकं ज्ञानं.........।'[१७]

अर्थात् सत्त्वेन विज्ञानं वर्द्धयन्तः जीवाः अमरेषु, रजसा उद्योगं वर्द्धयन्तः जीवाः दनुजेषु च उपजायन्ते । ये जीवाः अमरत्वं प्राप्नुवन्ति ते तु सत्त्वगुणप्रधानाः भवन्ति परञ्च ये मनुजत्वं दनुजत्वं च प्राप्नुवन्ति तेषु सत्त्वगुणस्य अभावः भवति । अतः तेषु एव दानवेषु ज्ञानक्रियाशक्तिविध्वंसिषु सात्त्विकानां वैरल्यप्रदर्शने आचार्यः वदति –



**एवं संसरन्तः केचिदेवाविरतं बहुभिः शरीरैः सत्त्वमेव संवर्द्धयन्ते ।**[१८]

आशयोऽयं यत् मनुजदनुजादीनि अनेकविधशरीराणि प्राप्य तेषु केचन विरलाः निरन्तरं बहुभिः शरीरैः रजस्तमोऽभिभूत्या यथोचिताहारविहारेण सत्त्वमेव संवर्द्धयन्ते । तस्मात् परिणामरूपेण जीवेषु पूर्णविज्ञानं सम्पद्यते । यथा –

**रजस्तमोऽभिभूत्या सत्त्वसमृद्ध्या पूर्णविज्ञानं सम्पद्यते ।**[१९]

एवं जीवेषु पूर्णविज्ञानं सम्पाद्य तस्य फलप्रदर्शने कथितम् –

**तेन विवेकः उत्पद्यते ।**

विज्ञानवन्तो हि प्रमाणेन प्रमितं लक्षितमन्वयव्यतिरेकाभ्यां परीक्षितं विवेचयन्ति । सर्वेऽपि संस्कारा अभ्यासमहिम्नैव स्थायितां प्रतिपद्यन्ते ।[२०]

पूर्वमेव सत्त्वस्य परिभाषायां कथितमस्ति – 'येन विज्ञानं वर्द्धते तत् सत्त्वम्' अतः विवेकेन मनुजदनुजादिजीवेषु अपि संस्कारः भवति । तेन संस्कारेण ते सात्त्विकजना इव व्यवहरन्ति । एवम् अभ्यासमहिम्ना स्थायितां प्राप्य सत्त्वसमृद्ध्या अमरत्वं (ईश्वरत्वं) प्राप्नुवन्ति ।

## सत्त्वस्य श्रेष्ठता

गीतायाम् उल्लिखितमस्ति –

**ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।**
**जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥**[२१]

एवमेव उपेन्द्रविज्ञानदर्शने कथितम् –

'प्रकृतिरेव रजसा सात्त्विकानुपर्युपरि पूर्वपूर्वविज्ञानापेक्षयोत्तरोत्तराधिक-विज्ञानसम्पादनयोग्यशरीराणि नयन्ती प्रापयन्ती.......।'[२२]

सत्त्वसमृद्ध्या श्रेष्ठतां प्राप्य ईश्वरताप्रयोजकत्वेन सात्त्विकाः स्ववासनानुरूपेण नवानां जीवानाम् उत्पादने सहायकाः भवन्ति । अर्थात् ईश्वरः सत्त्वगुणप्रधानः । तस्मात् सत्त्वसमृद्ध्या सः मिथ्याज्ञानं निवर्त्य

स्वकल्पनाशक्त्या नवान् जीवान् उत्पादयति । सृष्टेः सञ्चालनं करोति इत्यभिप्रायः ।[२३]

## सात्त्विकानां वृत्तिः

यदा जीवाः स्वस्मिन् सत्त्वगुणं सम्पादयन्ति तदा ते विज्ञानवन्तः विवेकिनः भूत्वा उपशान्ताः तिष्ठन्ति । तथा च एतेषाम् इच्छाकार्यं सर्वमपि सात्त्विकं भवति । अतः एते सात्त्विककार्यस्य सिद्धये सात्त्विकदेवस्य एव उपासनां कुर्वन्ति इति आचार्यः अनेन सूत्रेण कथयति –

**तेषु विज्ञानवन्तो विवेकिन उपशान्ता विज्ञानविवेकविरागालयं दयालुवर्यमुपशान्तं त्रिनेत्रं चतुर्भुजं पञ्चवक्त्रं महेश्वरं स्वाभीष्टप्रदत्वेनोपासते ।**[२४]

इतोऽपि स्पष्टं कर्तुम् अस्मिन् विषये आचार्यः वदति –

**एवं सात्त्विकाः सात्त्विकं राजसा राजसं तामसास्तामसं तमात्मानमेवोपासते ।**[२५]

ये सात्त्विकाः भवन्ति ते सात्त्विकदेवस्य ये राजसाः भवन्ति ते राजसदेवस्य तथा च ये तामसाः भवन्ति ते तामसदेवस्य उपासनां कुर्वन्ति । अतः सात्त्विकानां व्यवहारः विज्ञानानुरूपं, राजसानाम् अर्थानुरूपं, तामसानाम् आग्रहानुरूपं भवति । वस्तुतः प्रकृतिरेव एतत् सर्वं कारयति इति अत्र आचार्यस्य अभिप्रायः स्पष्टः भवति ।

अतः वक्तुं शक्यते अस्मिन् ग्रन्थे आचार्यस्य उपेन्द्रदत्तपाण्डेयस्य प्रतिभया नवीना कल्पना प्रसूता अस्ति । यद्यपि अस्मिन् ग्रन्थे अन्यैः दर्शनग्रन्थैः सह कुत्रचित् समानता प्रतीयते तथापि कुत्रचित् सूत्राणां निरूपणे तथा च विषयाणामुपस्थापने आचार्यस्य स्वतन्त्रचिन्तनमपि प्रतीयते । तदेव सम्पूर्णस्य उपेन्द्रविज्ञानदर्शनस्य अनन्यसाधारणत्वम् इति कथयितुं शक्यते ।



**सन्दर्भसङ्केतः –**


१. गीता १४/६

२. सांख्यकारिका, १३

३. उपेन्द्रविज्ञानदर्शनम् (उ०वि०दि०), मध्यमाधिकारः(म०), १४ सूत्रम्

४. उ०वि०द०, म०, १३ सूत्रस्य उपस्थापना

५. उ०वि०द०, म०, १३ सूत्रम्

६,७,८. उ०वि०द०, म०, १३ सूत्रस्य वृत्तिः

९. उ०वि०द०, म०, १४ सूत्रं वृत्तिश्च

१०. सांख्यकारिका ११

११. गीता १४/१०

१२. सांख्यकारिका १२

१३. उ०वि०द०, कनिष्ठाधिकारः (क०)११ सूत्रं वृत्तिश्च

१४. गीता १४/९

१५. सांख्यकारिका, १२

१६. उ०वि०द०, म०, १७ सूत्रम्

१७. उ०वि०द०, म०, ३६ सूत्रम्

१८. उ०वि०द०, म०, ३७ सूत्रम्

१९. उ०वि०द०, म०, ३८ सूत्रम्

२०. उ०वि०द०, म०, ३९ सूत्रं वृत्तिश्च

२१. गीता, १४/१९

२२. उ०वि०द०, म०, ४२ सूत्रं वृत्तिश्च

२३. उ०वि०द०, म०, ४३ सूत्रं वृत्तिश्च

२४. उ०वि०द०, क०, ६ सूत्रम्

२५. उ०वि०द०, क०, ८ सूत्रम्


❖

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

स्थापनातिथिः 22.2.1987

निबन्धनसंख्या 424/1994-95

कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 224193

आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)

पञ्जीकरणसंख्या - RNI 58951/94

संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् ।



# ऋग्वेदे नेतृविमर्शः

डॉ० सुनीलकुमार प्रधानः

अस्माकं देशः भारतवर्षं बृहत्प्रजातान्त्रिकदेशोऽस्त्यत्र नास्ति काचित् विचिकित्सा । प्रजातन्त्रमिति नास्ति कश्चन नूतनः अश्रुतपूर्वः वा शब्दः अपितु ऋग्वेदे **'व्यचिष्टे बहुपाय्ये यतेमहि स्वराज्ये'**[1] इत्यस्मिन् ऋचांशे 'बहुपाय्य' इति शब्दः प्रजातन्त्रस्य कृते एव विहितोऽस्तीति सातवलेकरमहोदयाः । अथ च सिद्धमिदं यत् प्रजातन्त्रस्य वाहकमस्ति वैदिकवाङ्मयम् । विस्तारभयेन प्रजातन्त्रविषये इतोप्यधिकं नोल्लिख्यते । प्रजातन्त्रे लोकतन्त्रे वा सामान्यजनानां महती सहभागिता भवति । यथा प्रावोचत् महान् राजनीतिकः लिंकनमहोदयः—'प्रजातन्त्रं प्रजायाः प्रजायै तथा च प्रजाद्वारा शासन'मिति । अस्मिन् प्रजातन्त्रे प्रजाद्वारा एव केचन राष्ट्रियनियमाः निर्धारिताः भवन्ति । वस्तुतः नियमनिर्माणक्रमे प्रजानां प्रतिनिधयः (नेतारः) महद्भूमिकां निर्वहन्ति । अतएव, अग्निदेवतायाः व्याजेन कथितमस्ति यत् राष्ट्रियाऽनुशासनस्योल्लङ्घनकारिणः जनान् नेता (अग्निः) नाशयतु ।[2] होता, पोता, नेष्टा[3] इति शब्दाः अग्नये विहिताः । 'नेष्टा' अष्टर्त्विक्षु एकः ऋत्विगिति । अयमेव 'नेष्टा' नेता इति संज्ञितः । नेता इति शब्दः लोके बहुषु अर्थेषु प्रयुज्यते । किन्तु नयतीति नेता' एवञ्च 'नी' (प्रापणे) धातोः 'तृच्' प्रत्यये कृते शब्दोऽयं निष्पद्यते । आशयोऽयं जनेषु अग्रणीभूय जनान् उन्नतिपथं नयमानः व्यक्तिविशेषः नेता इति ।

वेदार्थस्य क्षेत्राणि पश्यामश्चेत् कथ्यस्य तथ्येन सह समञ्जनं भवति । प्रायशः सर्वासां वैदिक-ऋचानामर्थाः बहुविधाः भवितुं शक्यन्ते

तद्यथा–अधिभूताधिदेवाधियज्ञाध्यात्मकादयः । समाजस्य राष्ट्रस्य वा विषये कृतोऽर्थः अधिभूतार्थः, वैश्विकोन्नतिकामाय योऽर्थः क्रियते स अधिदेवार्थः, यज्ञविषयकमर्थग्रहणं ह्यधियज्ञार्थः तथा च शरीरसम्बद्धाः अर्थाः अध्यात्मकाः। विचारणीयोऽयं विषयः यदुक्तेषु सर्वेष्वपि क्षेत्रेषु देवानामर्थोऽपि परिवर्तितः भवति, यथा–अधिभूतार्थे अग्निः इन्द्रश्च ज्ञानक्षत्रिययोः प्रतीके, अधिदेवार्थे चाग्निः विद्युतः निर्देशकः इति । अनेन स्पष्टमिदं यत् वैदिक–ऋचानामेते भिन्नाः भिन्नाः अर्थाः स्वकीये क्षेत्रे समीचीनाः संगताश्च वर्तन्ते । अत एव इह ह्यधिभूतार्थः मया सम्पादितः ।

देवेषु सर्वथा अग्रणीभूतत्वात् अग्निः 'नेता' अस्तीति वक्तुं शक्नुमः। यद्यपि ऋग्वेदे मन्त्रद्रष्टारः ऋषयः स्तवनप्रसङ्ग बहुदेवानां नेतृत्वं साधयन्ति तथापि अग्निरिन्द्रश्च स्वप्रभाविगुणैः नेतृरूपेण प्रतिष्ठितौ स्तः । मूलतः एतद्द्वारा एव ऋग्वेदः नेतृणां गुणनिर्धारणं प्रकुरुते ।[4] लौकिकसाहित्ये 'नेता' इत्यस्य कृते 'राजन्'शब्दः नैकेषु काव्येषु प्रयुक्तो वर्तते । रामायण–किरातार्जुनीय–शिशुपालवधप्रभृतिषु काव्येषु राज्ञः कर्तव्यं यद्विहितं तस्याक्षेपः नेतृगुणे एव करणीयम् । नाट्येष्वपि एतत्–सम्बद्धानि अनेकानि तथ्यानि प्राप्यन्ते । उत्तररामचरिते महाकविना भवभूतिना निगदितम्–

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥[5]**

एतेन ध्वन्यते यत् नेतारः राजानः वा प्रजानुरञ्जनाय सर्वं हातुमुद्युक्ताः स्युः । संस्कृतेतरकाव्येषु 'नेता' इत्यस्य कृते अन्येऽपि 'मुखिया'सदृशाः शब्दाः प्राप्यन्ते । एवमेव भणति गोस्वामितुलसीदासः यद् यथा 'मुखिया' मुखमिव सर्वाण्यङ्गानि सविवेकं पुष्णाति[6] तथैव नेतारः प्रजानां हिताहितचिन्तनं विधाय प्रजापालनं कुर्युः । अथ च ऋग्वेदे नेतृगुणविमर्शः कथं वरीवर्ति तत् पश्यामः ।

प्रवर्त्तमानेऽस्मिन् समये नेतारः प्रायशो बहुभाषिणः सन्ति । तेषां वचसः कर्मणा सह सर्वथा विरोधः, सान्त्वनावचसामेवाधिक्यम् अस्ति । अत एव ते न आनन्दप्रदायकाः न च जनहितैषिणः । अपरन्तु स्वकर्मणाऽऽनन्दप्रदायकाः मिष्टहितभाषिणः तेजस्विनेतारः निजयशसा सर्वत्र (त्रिलोक्यां) प्रव्रजन्ति । यथा हि ऋग्वेदे '**मन्द्रः मधुवचाः अग्निः परि एति** ।'[7] न केवलं नेतृणां वचःकर्मणोः परस्परं साम्यं स्यादपितु सर्वतः ते खलु मातृपितृवत् तथा च मित्रवत् प्रजानां हितकार्येषु दत्तचित्ताः स्युः । लोकहितचिन्तने तादृशाः नेतारः एव श्रेष्ठाः नान्ये ।[8] श्रेष्ठचिन्तनैरेव नेता जनेषु वरेण्यः भवति ।

अग्निदेवः प्राणरूपेण प्राणिषु वसतीति ऋषयः । प्राणाभावे सर्वं निस्सारमेव विद्यते । अतः कस्यचित् राष्ट्रस्य नेता तस्य राष्ट्रस्य प्राणभूतः प्रहरी च । उत्तमनेतुरभावे राष्ट्रमपि मृतवत् भवति । अग्निः यथा पविकर्ता तथैव नेता स्वकीये राष्ट्रे उत्तमवातावरणं कथं प्रसरेत् तादृशं यत्नं विदधाति ।[9] इन्द्रः सज्जनानां कामनापूरकः स्वयम् ऐश्वर्यवान् च वर्तते । स्वपराक्रमैरग्निः इन्द्रश्च यथा सज्जनान् पातः तथैव नेता सत्पुरुषसुरक्षायां रतः दुष्टदमने दक्षश्च भवेत् ।[10] आशयोऽयं यत् नेता बुद्धिपूर्वकं कर्मसम्पादकः पवित्रः (आन्तरिकबाह्यशुचियुतः) पराक्रमी बलवान् ऐश्वर्यवान् च स्यात् । वस्तुतः स्थिरधियैव नेता राष्ट्रं धारयति तथा च शक्तिशालिराष्ट्रस्य निर्माणं करोति । धृतव्रताः तन्नाम नियमसंरक्षकाः नेतारः तादृशं चिन्तनं कुर्युः येन नियमोल्लङ्घनं न स्यात् । अन्यथा सर्वत्र अनुशासनहीनतायाः साम्राज्यमेव भविष्यति ।

ऋग्वेदे देवव्याजेन स्पष्टीभवति यदुत्तमकर्मकर्तारं नेतारं विद्वद्गणाः श्रेष्ठस्थाने संस्थापयन्ति । यतस्ते विद्वांसः एव नेतृणां चयनं कुर्युः ।[11] चयनाधाराश्च प्रभाविगुणाः भवन्तु न हि वंशपरम्परा । प्रजातन्त्रशासने यदि प्रबुद्धाः मताधिकारिणः नेतृचयनं सम्यक् कुर्युः तथा राष्ट्रस्योन्नतिः दिनानुदिनं भवेत् । एतत्प्रक्रियाभिः यः नेता जनानां पुरतः समागमिष्यति स एव जनपुरोधाः राष्ट्रनायकः । ऋग्वेदगते नेतृविमर्शं कल्पयित्वा भावयामि यदस्माकं देशे नेतारः ईदृशाः स्युरिति दिक् ।

सन्दर्भसूची :-

1. ऋग्वेदे, 5/66/6
2. ऋग्वेदे, 4/5/4
3. ऋग्वेदे, 2/1/2, 'होत्रं पोत्रं नेष्ट्रं'
4. ऋग्वेदे, 2/1/3, 2/2/3, 3/27/9, 3/53/17-अग्निव्याजेन
   ऋग्वेदे, 3/34/6, 3/38/6 - इन्द्रव्याजेन
5. उत्तररामचरितम्, 1/12
6. श्रीरामचरितमानसे
7. ऋग्वेदे, 4/6/5
8. ऋग्वेदे, 3/18/1, 5/85/7 ' सखा इव पितरा इव साधुः भव'
9. ऋग्वेदे, 2/1/2
10. ऋग्वेदे, 2/1/3, 3/29/6, 3/53/23
11. ऋग्वेदे, 3/54/17

❖



# वाल्मीकीयरामायणस्य बालकाण्डे क्तप्रत्ययान्तशब्दानां प्रयोगवैविध्यम्

कुमारी निवेदिता

वाल्मीकिना विरचितं रामायणम् आदिकाव्यम् । तदर्थम् उत्तरकालिकानां ग्रन्थानां कृते उपजीव्यम्, शास्त्राणां कृते एकः मानकः ग्रन्थश्च । अयं ग्रन्थः उपजीव्यः ग्रन्थः तदर्थम् अत्र प्रयुक्ता भाषा प्रामाणिकी उपजीव्या च ।

भाषायाः आधारः व्याकरणम् । किन्तु समग्रस्य वाल्मीकेः रामायणस्य व्याकरणस्य समीक्षणं नाम महद् दुस्तरं कार्यम्, अतः तस्मात् कस्यचित् व्याकरणस्य लघुः अंशः समीक्षणीयः । अत्र रामायणस्य 'बालकाण्डे' 'क्त'प्रत्ययस्य प्रयोगवैविध्यं दर्शयितुकामा अस्मि ।

अत्र बालकाण्डे 'क्त'प्रत्ययस्य प्रयोगबाहुल्यं दृश्यते । क्वचित् सारल्यप्रतिपादनाय क्वचित् छन्दःपूर्तये, क्वचित् अयं क्तप्रत्ययान्तः समस्तः क्वचित् असमस्तः । समस्तेऽपि क्वचित् लघुः समासः क्वचित् दीर्घः समासः । तत्राऽपि क्वचित् पूर्वपदे समासः क्वचिद् उत्तरपदे क्वचित् मध्ये एव । समस्तेऽपि क्वचित् क्तप्रत्ययान्तस्य शब्दस्य शक्तिः क्षीणा भवति, कुत्रचित् समस्तेऽपि असमस्तवत् पूर्णा शक्तिः लक्ष्यते यथा लोकानां हितकाम्यया[1], आदिकविः उपसृष्टे (उपसर्गयुक्ते) अपि तथैव क्वचित् उपसृष्टं क्वचिद् अनुपसृष्टं क्वचिद् एकेन उपसर्गेण कार्यं साधयति क्वचिच्च विविधान् उपसर्गान् प्रयुनक्ति ।

एवम् आहत्य बालकाण्डे प्रयुक्तानां क्तप्रत्ययान्तानां शब्दानां द्विधा विभागं कर्तुं शक्यम्–(क) अर्थगतवैविध्यम् (ख) शब्दगतवैविध्यम्।

(क) अर्थगतं वैविध्यम्

१. क्वचिद् एकस्मादेव धातोः क्तप्रत्ययान्तस्य प्रयोगे उपसर्गमात्रपरिवर्तनेन विविधान् अर्थान् साधयति कविः । यथा –

(i) प्र–आप् → प्राप्तम्, 'प्राप्तम्' इत्यर्थे –
अद्य यज्ञफलं **प्राप्तं** भगवद्दर्शनान्मया ।।[2]

(ii) सम्–आप → समाप्तम्, 'पूर्णतां गतम्' इत्यर्थे –
ततो यज्ञे **समाप्ते** तु ऋतूनां षट् समत्ययुः ।।[3]

(iii) प्र–आप् → प्राप्तम्, 'आगतम्' इत्यर्थे –
यज्ञोपसदनं ब्रह्मन् **प्राप्तोऽसि** मुनिभिः सह ।।[4]

(iv) वि–आप् → व्याप्तम्, 'विस्तृतम्' इत्यर्थे –
नैशेन तमसा **व्याप्ता** दिशश्च रघुनन्दन ।।[5]

(i) सम्–गम् → संगतम्, 'साहचर्यम्' इत्यर्थे –
यस्मान्निवारिता चाहं **संगता** पुत्रकाम्यया ।।[6]

(ii) निः–गम् → निर्गतम्, 'निर्गमनम्' इत्यर्थे –
यदस्या **निर्गतं** तस्मात् तप्तजाम्बूनदप्रभम् ।।[7]

(iii) वि–गम् → विगतम्, 'समाप्तम्' इत्यर्थे –
स्पृष्टमात्रे तदा पाणौ विकुब्जा **विगतज्वराः** ।।[8]

(i) प्रति–ज्ञा → प्रतिज्ञातम्, 'प्रतिज्ञा' इत्यर्थे –
आरोहणं **प्रतिज्ञातं** नानृतं कर्तुमुत्सहे ।।[9]

(ii) अभि–अनु–ज्ञा → अभ्यनुज्ञातम्, 'आदिष्टम्' इत्यर्थे –
विश्वमित्राभ्य**नुज्ञातः** सह सर्वैर्महर्षिभिः ।।[10]

(iii) वि–ज्ञा → विज्ञातम्, 'ज्ञानम्' इत्यर्थे –
विदेशेष्वपि **विज्ञाताः** सर्वतोबुद्धिनिश्चयाः ।।[11]



(i) सम्–पद् → सम्पन्नम्, 'युक्तम्' इत्यर्थे –
सर्वलक्षण**सम्पन्ना** नारीणामुत्तमा वधूः ।।[12]

(ii) उत्–पद → उत्पन्नम्, 'उत्पत्तिः' इत्यर्थे –
**महदुत्पन्नमाख्यानं** शमायणमिति श्रुतम् ।।[13]

(iii) प्र–प्रद् → प्रपन्नम्, 'आगमनम्' इत्यर्थे –
शरणं वा **प्रपन्नोऽहं** शरण्याशरणं गतः ।।[14]

२. पुनश्च एकस्मिन्नेव अर्थे एकस्मादेव धातोः विविधाः उपसर्गाः प्रयुक्ताः सन्ति, यथा – **आप्**धातोः क्तप्रत्यये अर्थः 'प्राप्तम्' इति –

(i) प्र–आप् → प्राप्तम् –
प्लावयत् पूतपाप्मानः स्वर्गं **प्राप्ता** रघूत्तम ।।[15]

(ii) सम्–प्र–आप् → सम्प्राप्तम् –
सागरं चाऽपि **सम्प्राप्ता** सा सरित्प्रवरा तदा ।।[16]

(iii) अनु–प्र–आप् → अनुप्राप्तम् –
तच्छ्रुत्वाऽह**मनुप्राप्तो** धनुर्गृह्यापरं शुभम् ।।[17]

एवमेव **ख्या**धातोः क्तप्रत्यये अर्थः 'कथितम्' इति –

(i) आ–ख्या → आख्यातम् –
एतत् ते **सर्वमाख्यातं** त्रिपथगामिनी ।।[18]

(ii) वि–ख्या → विख्यातम् –
पुत्रस्त्रैलोक्य**विख्यातो** भविष्यति न संशयः ।।[19]

(iii) प्रति–आ–ख्या → प्रत्याख्यातम् –
**प्रत्याख्यातो** वशिष्ठेन स ययौ दक्षिणां दिशम् ।।[20]

३. कुत्रचित् एकस्य धातोः उपसर्गस्य अपरिवर्तनेनाऽपि क्तप्रत्ययान्तस्य रूपस्य विविधार्थेषु प्रयोगः दृश्यते, यथा –

(i) आ–गम् → आगतम्, 'निःसृतम्' इत्यर्थे –
सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः ।।[21]

(ii) आ–गम् → आगतम्, 'उत्पन्नम्' इत्यर्थे –
यस्य ते धार्मिकी बुद्धिः **पुत्रार्थमागता** ।।[22]

(iii) गम् → गतम्, 'प्राप्तम्' इत्यर्थे –
दीक्षां **गतो** ह्येष मुनिर्मौनित्वं च गमिष्यति ।।[23]

(iv) गम् → गतम्, 'नष्टम्' इत्यर्थे –
पितामहान् भस्मकृतानपश्यद् **गतचेतनः** ।।[24]

(v) उप–आ–गम् → उपागतम्, 'कृतम्' इत्यर्थे –
दर्शिता राजपुत्राय **तपोदीर्घमुपागता** ।।[25]

(i) प्र–आप् → प्राप्तम्, 'आगतम्' इत्यर्थे –
यज्ञोपसदनं ब्रह्मन् **प्राप्तोऽसि** मुनिभिः सह ।।[26]

(ii) प्र–आप् → प्राप्तम्, 'लब्धम्' इत्यर्थे –
धर्मिणां प्रवरेणाथ नैष **प्राप्तो** मनोरथः ।।[27]

४. पुनः एकस्मिन्नेव अर्थे बहुभ्यः धातुभ्यः क्तप्रत्ययान्तयोगेन निष्पन्नाः शब्दाः अपि उपलभ्यन्ते –

'युक्तम्' इत्यर्थे एते धातवः प्रयुक्ताः

(i) यु → युतम् – हृष्टपुष्टजना**युतम्**[28]
(ii) युज् → युक्तम् – ज्येष्ठगुणै**र्युक्तम्**[29]
(iii) वृध् → वृद्धम् – चिरसं**वृद्धम्** आश्रमम्[30]
(iv) स्फाय् → स्फीतम् – **स्फीतः** जनपदः[31]
(v) विस्तॄ → विस्तीर्णम् – **विस्तीर्णा** श्रीमती (अयोध्या)[32]

एवमेव 'कथितम्' इत्यर्थे –

(i) भाष् → भाषितम् – जनक**भाषितम्**[33]
(ii) सम्-आ-दिश् → समादिष्टम् – **समादिष्टाः** सचिवाः[34]
(iii) अभि–अनु–ज्ञा → अभ्यनुज्ञातम् – विश्वामित्रा**भ्यनुज्ञातः**[35]
(iv) कथ् → कथितम् – **कथितं** नारदेन[36]



(v) आ–विद → आवेदितम् – रामाया**वेदितं** सर्वम्[37]
(vi) स्मृ → स्मृतम् – त्रिपथगा **स्मृता** गङ्गा[38]

'नष्टम्' इत्यर्थे

(i) प्र–नश् → प्रणष्टम् – **प्रणष्टस्य**[39]
(ii) हृ → हृतम् – **हृतकर्णाग्रनासिकाम्**[40]
(iii) गम् → गतम् – विकुब्जा **विगतज्वराः**[41]
(iv) नि–सूद → निषूदितम् – काव्यमाता **निषूदिता**[42]
(v) परि–क्षम्=परिक्षतम् – गुरुशाप**परिक्षतः**[43]
(vi) अप–वह् (णिच्) → अपवाहितम् – चारवो**ऽपवाहितः**[44]

**(ख) शब्दगतं वैविध्यम्**

क्तप्रत्ययान्तानां शब्दानां प्रयोगेऽपि बहु वैविध्यं दृश्यते–क्वचित् समस्ताः उपसृष्टाश्च, क्वचित् समस्ताः अनुपसृष्टाः, केवलं क्वचित् उपसृष्टाः (समस्ताः न), क्वचित् स्वतन्त्राः (न समस्ताः न उपसृष्टाः)। क्वचित् क्तप्रत्ययान्ताः श्रवणे समानाः, क्वचित् असमानाः, क्वचित् क्तप्रत्ययान्ताः विशेषणरूपेण समस्ताः दृश्यन्ते ।

क्तप्रत्ययान्तानाम् अन्तिमवर्णसाम्यमाश्रित्य अधोलिखिताः वर्गाः क्रियमाणाः सन्ति । तद्यथा –

१. टान्ताः क्तप्रत्ययान्ताः –

- समस्ताः उपसृष्टाश्च → प्रहृष्टवदन, परमसंहृष्ट, नित्यसन्तुष्ट, कोपसमाविष्ट, आकृष्टव्रतधर्मज्ञ,[45] हुंभारवोत्सृष्ट[46] ।
- समस्ताः अनुपसृष्टाश्च → हृष्टमुदित, दृष्टवीर्य, दुष्टभाव, क्रोधविष्ट ।
- उपसृष्टाः → संहृष्ट, प्रहृष्ट, सम्प्रहृष्ट, सुसंहृष्ट,

परितुष्ट, सुसंतुष्ट, उपसंदृष्ट, संदृष्ट, आदिष्ट, समादिष्ट, विनष्ट, प्रणष्ट, आविष्ट, निविष्ट, उपविष्ट, अनुशिष्ट,[47] परितुष्ट, सुसंतुष्ट, अनुशिष्ट ।

- स्वतन्त्राः → इष्ट, हृष्ट, तुष्ट, कष्ट, दृष्ट, पुष्ट, भ्रष्ट, मृष्ट, विष्ट, क्लिष्ट, धृष्ट, स्पृष्ट।

२. नान्ताः –

- समस्ताः उपसृष्टाश्च → गुणसम्पन्न, विषण्णवदन, प्रसन्नात्मा।
- समस्ताः अनुपसृष्टाश्च → छिन्नभूजा
- उपसृष्टाः → उत्पन्न, आपन्न, प्रपन्न, सम्पन्न, प्रसन्न
- स्वतन्त्राः → भग्न

३. धान्ताः –

- समस्ताः उपसृष्टाश्च → चिरसंवृद्ध, तपश्चरणसंसिद्ध
- समस्ताः अनुपसृष्टाश्च → लब्धसंज्ञ, अलुब्ध, परमक्रुद्ध, सिद्धार्थरणसेवित
- उपसृष्टाः → संक्रुद्ध, प्रवृद्ध, अतिवृद्ध
- स्वतन्त्राः → क्रुद्ध, लब्ध, रुद्ध, वृद्ध, शुद्ध

४. तान्ताः –

- समस्ताः उपसृष्टाश्च → असम्प्राप्तव्रत, परमप्राप्त, अव्यक्तप्रभव, कैतूहलसमन्वित, मुदान्वित, प्रतिघातार्थ, घोराभिसंहित, कल्मषोपहत, विकृतानना, त्रैलोकविख्यात, विगतज्वर, निक्षिप्तमात्र, विजितेन्द्रिय, तपोबलसमर्जित, शोकसन्तप्तहृदय, परमसंत्रस्त, दयोद्घूष्ट, निनादित, किंकिणीविभूषित, ब्रह्मबल-संभृत, हृष्टपुष्टजनायुत, राज्यभारनियुक्त,[48] नियतेन्द्रिय, श्वमांसनियतहारा,[49] संरक्तलोचन, प्राणातिपातनिरत,[50] गन्धमाल्यानुलेपित, लोभमोहविवर्जित, हेमवर्णाम्बराकृत, लोकविश्रुत, समुपस्थितयौवन, द्विजसंगनिसेवित, कुवंशप्रसूत ।

- समस्ताः अनुपसृष्टाश्च → प्रतापहतकण्टक, हुताग्निहोत्र, हतकर्णाग्रनासिका, हितार्थाय, वरदानकृत, अलंकृत, विष्णुदेवनमस्कृत, तीव्रशब्दपुरस्कृत, गतचेतन, महावाक्यबलचोदित, जातरूप, जितेन्द्रिय, स्वार्जित, तप्तजाम्बूनदप्रभ, त्रस्तनयन, मन्त्रपूत, परमप्रीत, आभरणभूषित, जनकभाषित, धातुमण्डित, मुक्तशाप, क्रोधमूर्छित, मुदितमानसा, स्नेहयुक्त, यथावृत, अशक्त, सुबहुश्रुत, क्षत्रधर्मस्थित, सिक्तराजपथारम्य, हंससारसेवित, शुचिस्मृत, पतिव्रत ।
- उपसृष्टाः → प्राप्त, समाप्त, व्याप्त, समनुप्राप्त, अभ्यक्त, समन्वित, समवेत, समुदित, अभिप्रेत, समाहत, अभिहत, अपहृत, विकृत, विक्रान्त, आक्रान्त, परिक्रान्त, समतिक्रान्त, नातिक्रान्त, आख्यात, विख्यात, प्रत्याख्यात, आगत, उपागत,

समुपागत, संगत, निर्गत, अनुगृहीत, अभिचोदित, निश्चित, प्रक्षिप्त, निर्जित, जृम्भित, प्रतिज्ञात, प्रदीप्त, निनादित, विनाशित, प्रणत, अभिनन्दित, निर्मित, प्रयतित, प्रतिपादित, सुप्रीत, अभिपूजित, प्रपूजित, विभक्त, विमोहित, संयुक्त, संयुत, प्रयत, समद्युक्त, नियत, उद्यत, अनुरक्त, अभिरत, अपवाहित, संवृत, आवृत, प्रवृत, विनिर्वृत्त, प्रशस्त, प्रशान्त, विश्रान्त, उपशोभित, विश्रुत, उपाश्रित, प्रश्रित, आस्थित, समास्थित, समुपस्थित, विप्रस्थित, निषूदित, विस्मित, सुविस्मित, निसृत, व्यवसित ।

स्वतन्त्राः → हत, मोहित, पतित, कृत, खात, ख्यात, गत, गुप्त, गीत, गृहीत, चोदित, चिन्तित, क्षिप्त, चरित, क्षुभित, जात, जित, तोषित, दृष्ट, दीप्त, दत्त, दयित, नोदित, पूत, पालित, पूरित, पूजित, भीत, भ्रान्त, मुदित, युक्त, याचित, रत, लोभित, विदित, शक्त, शान्त, स्थित ।

५. क्वचित् समासे सत्यपि विशेषणरूपेण पूवपदे व्यवहृताः क्तप्रत्ययान्ताः शब्दा उपलभ्यन्ते, तद्यथा –

हतपुत्रा, हतबलोत्साह, हतपुत्रबल, हतकर्णाग्रनासिका, कृतानना, शापकृतामर्श, कृतपौर्वाह्णिकक्रिया, कृतोद्धार, कृताञ्जलिपुट, कृताभिषेक, कृतोदक, कृताह्निक, विगतज्वर, गतकल्मष, गतचेतन, जितेन्द्रिय, विजितेन्द्रिय,



तप्तजाम्बूनदप्रभ, त्रस्तनयन, पूतपाप्मानः, हृष्टपुष्टजनायुत, श्वमांसनियताहार, संरक्तलोचन, क्रोधसंरक्तनयन, विषण्णवदन ।

अस्मिन् बालकाण्डे यथा एवं क्तप्रत्ययान्तविषयकं शब्दगतम् अर्थगतं शब्दगतं च वैविध्यं लभ्यते समग्रे वाल्मीकीय-रामायणेऽपि तथा वैविध्यं स्यादिति मन्ये । अत्र प्रयुक्तविविधता व्यावहारिक-संस्कृत-शिक्षणदृष्ट्या उपयोगिनी भवेत् इति चिन्तयामि । एवमेव अन्यत्र एतादृशेषु अन्येषु प्रामाणिकेषु ग्रन्थेषु अपि एतादृशं वैविध्यं प्राप्तुं शक्यं च इति आशयः ।

**सन्दर्भसूची :–**


**वाल्मीकीय रामायणम्**

गीता प्रेस सं० 2056, इक्कीसवाँ संस्करण

| | |
|---|---|
| 1- 1·37·4 | 2- 1·50·15 |
| 3- 1·18·8 | 4- 1·50·15 |
| 5- 1·34·15 | 6- 1·36·21 |
| 7- 1·37·28 | 8- 1·28·15 |
| 9- 1·60·27 | 10- 1·70·17 |
| 11. 1·7·17 | 12- 1·1·27 |
| 13- 1·5·3 | 14- 1·57·7 |
| 15- 1·43·41 | 16- 1·43·39 |
| 17- 1·75·2 | 18- 1·35·23 |
| 19- 1·37·25 | 20- 1·57·13 |
| 21- 1·2·40 | 22- 1·8·12 |
| 23- 1·30·4 | 24- 1·44·40 |
| 25- 1·51·4 | 26- 1·50·15 |
| 27- 1·44·8 | 28- 1·52·5 |

| | | | |
|---|---|---|---|
| 29- | 1·19·20 | 30- | 1·55·27 |
| 31- | 1·5·5 | 32- | 1·5·7 |
| 33- | 1·67·12 | 34- | 1·67·3 |
| 35- | 1·68·13 | 36- | 1·3·9 |
| 37- | 1·1·62 | 38- | 1·44·6 |
| 39- | 1·18·51 | 40- | 1·26·4 |
| 41- | 1·33·23 | 42- | 1·25·21 |
| 43- | 1·60·25 | 44- | 1·41·2 |
| 45- | 1·32·1 | 46- | 1·54·18 |
| 47- | 1·60·33 | 48- | 1·25·19 |
| 49- | 1·59·19 | 50- | 1·59·21 |

❖



# संस्कृतसौरभसञ्चयनम्

(अप्रकाशितसंस्कृतकाव्यनाटकादीनां संग्रहः प्रकाशनं च)

संस्कृतप्रसारपरिषच्छोधपत्रस्य 'आरण्यक'स्य परिशिष्टम्

षष्ठं पुष्पम्

# बालभक्तः प्रह्लादः

प्रणेता

**पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

संस्कृतप्रसारपरिषद्, आरा (बिहार) — सरस्वती नः सुभगा मयस्करत्

सम्पादकः

**डॉ० गोपबन्धु मिश्रः**

❑ संस्कृतसौरभसञ्चयनम्

❑ षष्ठं पुष्पम्

❑ बालभक्तः प्रह्लादः
(गद्यनिबद्धं चरितम्)

❑ प्रणेता
पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

❑ सम्पादकः
डॉ॰ गोपबन्धु मिश्रः

❑ प्रकाशिका
संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्, प्रकाशपुरी
आरा (विहारः)

❑ मुद्रकः
आरा प्रिन्टर्स
गोला महल्ला (निकट जैन स्कूल), आरा

# पुरोवाक्

पण्डित व्रजभूषण मिश्र 'आक्रान्त' महोदयेन विरचितं 'बालभक्तः प्रह्लादः' इत्याख्यं गद्यनिबद्धं चरितं प्राकाश्यमानीय संस्कृतप्रसारपरिषदियं मोदमनुभवति । पण्डित आक्रान्तमहोदयः अस्याः परिषदः संस्थापकोऽध्यक्षः आरण्यकस्य प्रधानसम्पादकश्चासीत् । गतवर्षे ३० मार्च, २००२ दिनाङ्के एतस्य महोदयस्य परलोकगमनं जातमिति कारणेन तस्य बहुविधाः रचनाः प्रकाशनप्रतीक्षायामेव आसन् । परिषदः पक्षतः तस्य 'हनुमच्चरितम्' इति विशिष्टं बृहत् गद्यनिबद्धं पुस्तकम् इदानीं प्राकाश्यमागतम् । आरण्यकस्य मार्च २००२ अङ्के तस्य 'ध्रुवचरितम्', सितम्बर २००२ अङ्के 'श्रवणकुमारचरितम्' इति गद्यनिबद्धं चरितद्वयं प्रकाशितम् । इदानीमस्मिन् अङ्के 'बालभक्तः प्रह्लादः' इत्येतत् गद्यनिबद्धं चरितं प्रकाश्यते ।

वयसा बालः परन्तु भगवतः विष्णोः अनन्यः भक्तः प्रह्लादः कस्यापि कृते अपरिचितो नास्ति । विष्णुविरोधिनः दुष्टस्य राक्षसस्य हिरण्यकशिपोः पुत्रः भूत्वाऽपि असौ विष्णुमेव ध्यायन् सर्वाभ्यः विपत्तिभ्यः निवृत्तो जातः । जले पातयित्वा पर्वतात् क्षिप्त्वा अथवा अग्नौ प्रदाह्य प्रह्लादं हन्तुं वारंवारं यतमानः तस्य पिता हिरण्यकशिपुः असफलः जातः। ततः सः स्वयमेव खड्गेन पुत्रं हन्तुमुद्युक्तोऽभवत् । किन्तु भगवान् विष्णुः सर्वव्यापी अस्ति, अतः पुरतः विद्यमाने स्तम्भेऽपि अस्ति इति प्रह्लादस्य दृढं वचनम् अस्वीकुर्वतः हिरण्यकशिपोः खड्गाघातेन द्विधा विभक्तात् तस्मात् स्तम्भादेव नरसिंहरूपधारी विष्णुरुद्भूय हिरण्यकशिपुं नखैः विदार्य हतवान् । बालस्य प्रह्लादस्य अविचला विष्णुभक्तिः साक्षात् विष्णुमपि अवतारयितुं क्षमा जातेति प्रसिद्धा भागवतकथा अस्मिन् चरितकथने अतीव सरलया भाषया चित्रिता अस्ति । ख्यातवृत्तस्य एतस्य संस्कृतगद्येन उपन्यासे आक्रान्तमहोदयस्य आस्तिकता संस्कृतप्रीतिश्च एतस्मिन् सुस्पष्टं प्रमाणिते भवतः ।

संस्कृतप्रसारपरिषदः आरण्यकाख्ये अस्मिन् शोधपत्रे 'संस्कृतसौरभसञ्चयनम्' इत्याख्यया योजनया अप्रकाशितानां संस्कृतकाव्यनाटकदर्शनादिग्रन्थानां सम्पादनपुरःसरं प्रकाशनमुद्दिष्टमस्ति । प्रकाश्यमाना ग्रन्था अत्र 'पुष्प' इति पदवाच्याः भवन्ति । तेषां 'सौरभं' सर्वत्र सञ्चरेदिति अत्र ध्येयमस्ति । अस्यां योजनायाम् एतावत्पर्यन्तं प्रकाशितानि 'पुष्पाणि' एवं सन्ति –

| पुष्पम् | ग्रन्थः | रचयिता |
|---|---|---|
| प्रथमम् | सुदामचरितम् | पं० बहोर पाठकः |
| द्वितीयम् | उपेन्द्रविज्ञानदर्शनम् | पं० उपेन्द्रदत्त शर्मा |
| तृतीयम् | भावनाविलासशतकम् | पं० उपेन्द्रदत्त शर्मा |
| चतुर्थम् | ध्रुवचरितम् | पं० व्रजभूषण मिश्र 'आक्रान्तः' |
| पञ्चमम् | श्रवणकुमारचरितम् | पं० व्रजभूषण मिश्र 'आक्रान्तः' |

इदानीमेतत् 'बालभक्तः प्रह्लादः' इत्याख्यं चरितं षष्ठपुष्परूपेण प्रकाश्यमानमस्ति । एतेन प्रकाशनेन संस्कृतसाहित्यागारे श्रीवृद्धिः भविष्यत्यशास्यते ।

गोपबन्धु मिश्रः
सम्पादकः

# बालभक्तः प्रह्लादः

धन्येयं भारतभूमिर्यत्र परमात्माऽप्यवतरति। न केवलं परमात्मैवाऽत्र विविधं रूपं धारयत्यपितु तस्याऽवतारस्यार्थं मदोन्मत्ताः सनातनधर्मध्वंसिनो भुवं नरकं निर्मातुम्, मानवानपि दानवान् कर्तुं दैत्या अपि प्रादुर्भवन्ति। तेषामत्याचारेण सर्वान् धर्तुं समर्था धरा पुनः पुनः प्रकम्पते। हाहाकाररवः सर्वत्र सदा च श्रूयते। क्वचिच्चौराणां चातुर्यचर्चा, क्वचिद्दस्यूनां दुर्दान्तदमनीयता, क्वचिल्लुण्ठकानां लुण्ठनलीला, क्वचिद्राज्यकर्मचारिणामुत्कोचग्रहणगर्हितता, क्वचिद्रुधिरधारा, क्वचिद्दारापहरणम्, क्वचिद्बालाऽपहरणम्, क्वचिदवैध-प्रेमव्यापारः, क्वचिज्ज्वलनेन ज्वलनम् इत्येव श्रूयते अनुभूयते च । इत्येव दुःस्थितिः दितेः अपत्यं दैत्यः, तेषां दैत्यानां राजा दैत्यराजः, तस्य दैत्यराजस्य हिरण्यकशिपोः शासनकाले आसीत्।

स खलु दैत्यराजो यदा मांसभक्षणं कृत्वा मदिराञ्च पीत्वा खड्गं गदां वा आदाय चलति तदा मार्गे कोऽपि नाऽवतिष्ठते, तमनु तत्समर्थकाः, मदोन्मत्ताः विभिन्न-शस्त्रास्त्रयुक्ताः, विविधवाद्यं वादयन्तः, तज्जयध्वनिं कुर्वन्तः तस्य कुयशो गायन्तश्च चलन्ति । तस्याऽसमर्थनं यमराजस्याऽऽमन्त्रणमिव प्रतीयते स्म। तदानीं मुनयः ऋषयश्च गिरिगुहाः सेवन्ते स्म । लेखकाः, चिन्तकाः मनीषिणश्च भयेन तद्यशो गायन्ति स्म अथवा मौनमाकलय्य यथा-तथा जीवन्ति स्म । पत्रकाराश्चाटुकारितां कुर्वन्ति तटस्थतया वा वर्तन्ते स्म।

तस्य राज्ये न मन्दिरेषु घण्टानादः, न क्वचिद् यज्ञधूमः, न मठेषु वेदघोषः, न क्वापि शास्त्रचर्चा, न क्वापि शास्त्रार्थविलासः, न संस्कृतविद्यलयेषु विद्याविनोदः, सर्वेषु विद्यालयेषु प्रायः कालयापनम्, न कुत्रचिद्धरिहरकथा, न क्वापि कीर्तनञ्च। न केवलमित्येवाऽपितु न कोऽपि हरेर्नामोच्चारणमपि कर्तुं शक्नोति स्म।

तस्य दैत्यराजस्य 'एकचक्रापुरी' राजधानी सकलसमृद्धिभिः समृद्धा। किन्तु, सा समृद्धिः केवलं तमोगुणसम्पन्ना समृद्धिः। यद्यपि स हिरण्यमये आसने स्वपिति, अतएव हिरण्यकशिपुः इति कथ्यते स्म तथापि तस्य राज्ये

केनाऽप्युपायेन तस्य देवस्य साक्षात्कारं करवाम चेत्, कश्चनोपायो भविष्यति।

महामुनेर्नारदस्य वचनमाकर्ण्य सर्वे देवाः, ऋषयो मुनयश्च मिलित्वा विष्णोर्ध्यानं चक्रुः। साश्रुनयनैः, श्लथकण्ठैः, आर्तस्वरैश्च विष्णुसहस्रनाम्नां पाठमकुर्वन्। न केवलमित्येवाऽपितु स्वर्गस्यैव धरायां निपत्य साष्टाङ्गं प्रणेमुः। यदा ते सर्वभावेन तन्मयत्वमवापुस्तदा सशङ्खचक्रः, सकिरीटकुण्डलः, सपीतवस्त्रः, सरसिरुहेक्षणः, सहारवक्षःस्थलः, कौस्तुभश्रीः चतुर्भुजश्च विष्णुस्तत्र प्रादुर्बभूव।

सर्वे देवाः ऋषयो मुनयश्च चकितचकितास्तं विष्णुं ददृशुः ऊचुश्च—सर्वज्ञस्त्वं किं न जानासि ? सर्वलोकप्रपीडकः, भवतः सत्सनातनधर्मविनाशकः, संस्कृत-संस्कृतिसंहारको हिरण्यकशिपुः किं किं न करोति ? यदि त्वरितं तस्य विनाशो न भविष्यति चेत् सर्वलोकानां विनाशो भविष्यति।

विष्णुरुवाच—धैर्यं धरन्तु भवन्तः। अस्य विनाशं षड्वर्षाभ्यामनन्तरमेव करिष्यामीति कथयित्वा विष्णुरन्तर्दधौ। इत्थं सर्वकारणकारणस्य विष्णोर्वरदानवचनं संश्रुत्य, मुनयः, ऋषयो देवाश्च स्व-स्वस्थानं ययुः।

हे लेखनि! अधुना त्वं भूतलं चल, तस्य दैत्याधिपतेरेकचक्रापुर्यां राजधान्यां किं भवतीत्यस्य वर्णनं कुरु। राजभवनं प्रविश्य तत्र किं भवतीति पश्य। लेखन्या यद्दृष्टं तत् कथितम्—राजभवने कश्चिदुत्सवो दृश्यते। दैत्यराजमहिषी गर्भवती विद्यते। अतएव गृहस्य दास्यो वाराङ्गनाश्च गीतानि गायन्ति, विविधानि वाद्यानि वादयन्ति नृत्यन्ति च। दैत्यराजस्य भगिनी तु परमा प्रसन्ना दृश्यते। तस्य नृत्यन्त्वतीव मोदकरं प्रतीयते। सैव होलिका या शिवस्य प्रच्छन्नभक्ता। शिवस्य प्रसादात्तस्य शरीरे शीतलं चीरं वर्तते। तस्य चीरस्य प्रभावेण साऽग्नावपि प्रविश्य न ज्वलति। तस्य चीरस्य प्रभावेण जातस्य भ्रातृजस्य रक्षणं करिष्यतीति स्मृत्वा साऽतीव प्रसन्नाऽस्ति। तस्याः प्रसन्नताया वर्णनं कर्तुमहमसमर्था।

दैत्यराजोऽप्यन्तःपुरस्य समाचारं ज्ञात्वा प्रसन्नोऽभवत्। भाविपुत्रस्य कल्पनया तस्य हृदि ह्लादोऽजायत। तेन मनसा विचारितम्—तस्य नामकरणं प्रह्लाद इति करिष्यामि। यतः मे हृदि प्रकृष्टो ह्लादो जातः। दैत्यराजश्चिन्तयति—प्रह्लादो मदपि वीरतरो भविष्यति। अहन्तु भूतलमेव



वशीकृत्य शासनं करोमि, स तु देवलोकं पाताललोकञ्चात्मवशं करिष्यति। मम गत्या तु केवलं धरित्री प्रकम्पते तस्य गत्या तु स्वर्गः पाताललोकश्च कम्पिष्येते। एवं कल्पितं पुत्रं तस्य पराक्रमञ्च ध्यायं-ध्यायं सोऽतीव मोदते।

अनेन प्रकारेण गतिशीलः कालस्तत्राऽऽगतः यस्मिन् प्रह्लादस्य जन्माऽभवत्।

यदा प्रह्लादो जन्म लेभे तदा वसन्तकाल आसीत्। यद्यपि हिरण्यकशिपोः शासनकाले वसन्तः प्रच्छन्नो भूत्वाऽऽगच्छति स्म। शीतलो मन्दः सुगन्धितश्च पवनः सर्वत्र न चलति स्म, किन्तु स पवनः स्वच्छन्दगत्या सर्वत्र प्रावहत्। वासन्तिकेन पवनेन तस्य राज्ये सर्वत्र नोत्फुल्लता जायते स्म, किन्तु प्रह्लादस्य जन्मकाले सर्वत्रोत्फुल्लताऽजायत। तस्य दैत्यराजस्य काले आम्रकानने कोकिला मुक्तस्वरेण न गायन्ति स्म, किन्तु प्रह्लादस्य जन्मकाले कोकिला मुक्तस्वरेणाऽगायन्। तस्य दैत्यराजस्य राज्ये वासन्तिकानां सस्यानां न तादृशी सुषमा दृश्यते स्म यादृशी शोभा भक्तराजस्य प्रह्लादस्य जन्मकाले अदृश्यत। ऋतुराजस्य वसन्तस्येमां शोभामवलोक्य नगरवासिनश्च चकिता आसन्नेव दैत्यराजो हिरण्यकशिपुरपि चकित आसीत्। स विचारयति स्म—काचन दैवी शक्तिः प्रादुर्भविष्यति किम् ? मद्भयाद् वसन्तो बिभेति स्म, किन्त्वद्य निर्भयो भूत्वा कथं विचरति ? नासिकायां मदिरागन्धस्य स्थाने कथं पुष्पगन्धः प्रविशति। कर्णयोर्हाहाकारस्य चीत्कारस्य च ध्वनेः स्थाने कथं वीणाझंकारध्वनिरिव प्रविशति ? जिह्वायां मत्स्य-मांसस्वादस्य स्थाने मिष्टान्नमाधुर्यं कथमनुभूयते ? कथमेतत् परिवर्तनम् ? एवं चिन्ताचक्रे तस्य मनो नृत्यदेवाऽसीत्तदाऽन्तःपुरादागत्य काचन दासी सूचितवती—प्रभो! महाराज्ञी पुत्रमजनयत्। दास्या वचनं श्रुत्वा दैत्यराजो विस्मयाऽन्वितः प्रसन्नो जातोऽपृच्छच्च—अहा! पुत्रः! कीदृशः पुत्रः? अरी, तस्य जन्मकाले मेघा नाऽगर्जन् ? अशनिपातो नाऽभवत्? धरा नाऽकम्पत ? भूधरा न विदीर्णा? नद्यस्तटबन्धान् नाऽखण्डयन् ? एतद्विपरीतं सर्वत्र प्रसन्नता दृश्यते। वसन्तस्य साम्राज्यमस्ति। किं कश्चिद्देवो जन्म लब्धवान्?

दासी शिरोऽवनम्य, करौ सम्पुटीकृत्य चाऽवदत्—महाराज! यदि मेऽपराधः क्षम्यतां तदा कथयिष्यामि, क्षमायै वचनं देहि तदा वर्णयिष्यामि।

दैत्यराजोऽवदत्-नाऽहं त्वां हनिष्यामि। कथय कीदृशोऽस्ति पुत्रः ?

भोजनालयेषु केवलं मांसाहारः, जलपानाऽऽपणेषु सुरापानम्, राजमार्गमुभयतः कुक्कुट्यण्डभक्षणम्, संकीर्णासु वीथिषु स्थित्वैव मूत्रत्यागः, चलचित्रगृहेषु अश्लीलचित्रप्रदर्शनम्, ध्वनिविस्तारयन्त्रेण सर्वत्र कामोत्तेजकानि गीतानि। स्वच्छता का कथ्यते इति नगरवासिनो न जानन्ति। वस्तुतस्तत्र नगरपालिका न, नरकपालिका कार्यं करोति। सर्वत्र घोषणाऽऽसीत् न कश्चित् परमात्मा, परमेश्वरः, जगन्नियन्ता वा कर्तुमकर्तुमन्यथा कर्तुं समर्था काचिदन्या शक्तिः। सर्वशक्तिः केवलं हिरण्यकशिपुरेवाऽस्ति।

तस्य राज्ये केवलं काननेषु स्वतन्त्रता, गिरिगुहासु शान्तिः, फलवत्सु वृक्षेषु विनम्रता, लतासु लावण्यम्, कुसुमकोरकेषु कोमलता, पुष्पेषु सुगन्धिः, फलेषु मधुरता, सरसिजपत्रेषु अनासक्तिः, भ्रमरेषु भक्तिः, खगकलरवेषु प्रसन्नता, पवने पवित्रता, सूर्यचन्द्रयोरान्तरिकः बाह्यप्रकाशः आसीत्, न केषुचित् प्रजाजनेषु।

स च हिरण्यकशिपुः जन्मनैव विकराल आसीत्। यथा-यथा स यौवनं प्राप्नोत् तथा-तथा तस्य विकरालताऽवर्धत। तस्य शरीरं लघुपर्वताकारमभवत्। तस्य शिरसि वनस्पतयः इव नतोन्नताः केशाः आसन्। तस्य ललाटः शिलाखण्डमिव दृश्यते स्म। वक्राकारौ चपलौ भ्रुवौ स्वभङ्गिमया तस्य हृदयस्य कौटिल्यं प्रकाशयतः स्म। अत्युन्नताया नासिकायाः छिद्रे मलपूर्णे नगरनालिके इव प्रतीयेते स्म। मुखे विकृता दन्ता नतोन्नता बहिर्निर्गता वन्यशूकरदन्ता इव अनुमीयन्ते। मुखमण्डले श्मश्रूणि भल्लूकपुच्छमिवाऽस्तव्यस्ततां दधते स्म। ग्रीवा नतोन्नता पर्वताऽऽरोहणभूमिरिवाऽवलोक्यते स्म। स्कन्धौ विकृते गिरिशिखरे इव दृश्येते स्म। उदरं तस्य धान्यपूर्णा विशाला गोणी इव। कटिप्रदेशो विशालवृक्षस्य स्कन्ध इव। पादौ गजस्याऽग्रपादाविव प्रतीयेते स्म।

इत्थं यदा स गदामादाय चलति तदा धरा प्रकम्पते, मेघगर्जनमिव तस्य गर्जनं श्रुत्वा सिंहानामपि हृदयानि प्रकम्पन्ते स्म। भूतले कोऽपि वीरो नासीत्, यः तस्य समक्षं तिष्ठतु। एवमेव स कदाचिद् देवलोकं प्रति गत्वा देवान् प्रकम्पयति स्म। देवराज इन्द्रोऽपि तस्याऽऽगमनं श्रुत्वा स्वसुरक्षाभवनं प्रविशति स्म। ऐरावतो गजेन्द्रोऽपि तस्याग्रे न तिष्ठति स्म।

एवं तस्य दैत्याधिपतेर्हिरण्यकशिपोर्दुराचारं दृष्ट्वा श्रुत्वा चैकदा देवलोके देवानाम्, ऋषीणां मुनीनाञ्च सभाऽभवत्। सभायां तस्य दुर्दान्तस्य दैत्याधिपतेर्हिरण्यकशिपोरत्याचारस्य चर्चाऽचलत्। केनोपायेन त्रयाणां लोकानां रक्षा भवेदित्यस्य विषये विचारोऽभवत्। इन्द्रः नारदं प्रार्थयत–भवन्तस्तु सर्वत्र



भ्रमन्ति, सर्वं जानन्ति, किमिदं भवन्तो जानन्ति यदयं हिरण्यकशिपुः केन कारणेन सर्वं जगत् पीडयति संसारस्य सर्वान् वीरान् पराजयत, धर्मध्वंसनमकरोत्, प्रजाः पीडयामास, देवलोकमप्यागत्याऽस्मान् पराजयते। किमस्य संहारो न भविष्यति ? किं भवन्तं नारायणो न किमपि कथयति ? कदापर्यन्तमिदमुपद्रवं द्रक्ष्यति प्रभुः?

महामुनिनारदोऽब्रवीत्–हिरण्यकशिपुरयं महत्तपस्तप्तवान्। तत्तपसा सूर्यचन्द्रौ प्रभावितौ, नक्षत्राणि प्रभावितानि, पवनः प्रभावितः, धरा तु प्रभावितैव गगनोऽपि प्रभावितः, जनास्तु प्रभाविता एव पशुपक्षिणोऽपि प्रभाविताः। अन्ततो गत्वा ब्रह्माऽपि प्रभावितोऽभवत्। तस्य समक्षं चतुर्मुखो ब्रह्मा प्रादुर्बभूव प्रावोचच्च–हिरण्यकशिपो, किमर्थं तपस्तपसि ? किं वाञ्छसि ? मनसि तव काऽऽकाङ्क्षा वर्तते ? ब्रूहि किं याचसे ? तव तपोभिरहं प्रसन्नोऽस्मि। अक्षिण्युन्मीलय। विधेर्वचनं श्रुत्वा हिरण्यकशिपुना नेत्रे उन्मीलिते। चरणयोर्निपत्य स्वधन्यताञ्च स्वीचकार।

विधाता पुनरब्रवीत्-दैत्यराज, तव सुदीर्घेण तपसाऽहमत्यन्तं प्रीतोऽस्मि। अतो वरदानं याचस्व। शीघ्रतां कुरु। समयो नास्ति।

हिरण्यकशिपुर्ययाचे–हे ब्रह्मन्, नाहं म्रियै। न रात्रौ, न दिवा, नाकाशे, न धरायाम्, न गृहाऽभ्यन्तरे, न गृहाद् बहिः, न देवैर्न दानवैः, न केनापि पशुना, न पक्षिणा, नाग्निना, न जलेन, न कैरपि शस्त्रास्त्रैश्च।

हिरण्यकशिपोर्याचनामवगम्य प्रजापतिः 'एवमस्तु' इति कथयित्वाऽन्तर्दधौ।

तदनन्तरम् एवाऽयमुग्रो भूत्वा चलति, अकार्यं करोति, अवाच्यं वदति, विधर्ममाचरति, अखाद्यं खादति, अपेयं पिबति, संस्कृतं नाशयति, असंस्कृतं वर्धयते, विदूषकतां दर्शयति, कस्मैचिदप्यपशब्दैः स्वागतं करोति।

देवराजः पुनः सादरं नारदं पप्रच्छ–महामुने, अस्य दैत्यराजस्य विनाशस्य कोऽप्युपायो नास्ति किम् ? महामुनिना नारदेनोक्तम्–यदि रमापतिर्विष्णुः प्रसीदतु चेद् लोकत्रयस्य रक्षा भवेत्, अन्यथा नाऽन्यः कश्चिदुपायः। वयं सम्प्रत्येव तं विष्णुं ध्यायाम, आर्तस्वरेणाऽऽह्वयाम, दीनस्वरेण प्रार्थयामहै,

आश्चर्यमिश्रितेन स्वरेण दासी कथयितुमारभत–स्वामिन्, सर्वप्रथमन्विदमेव विस्मयकारकमस्ति यन्महाराज्ञी प्रसवकालस्याऽनुभूतिं तु कृतवती किन्त्वसह्यां पीडां नाऽनुभूतवती। प्रसन्नतयाऽस्माभिः सह वार्तालापं करोति स्मैव यत् शिशुः प्रादुरभवत्। प्रसवगृहे विलक्षणः प्रकाशो जातः। सहसा तत्र 'हरिःओ३म् तत्सत्' इति वाक्यमगुञ्जत्। शिशुः प्रसन्नमुखोऽदृश्यत। रोदनन्तु कृतवानेव न, अपितु हस्तपादान् चालयितुमारभत। तस्य शिशोः सर्वेष्वङ्गेष्वद्भुतं सौन्दर्यम्, पादयोस्तलेऽद्भुता लालिमा, करयोस्तलेऽपि विलक्षणं लावण्यम्, पृष्ठोदरयोर्विचित्रा कोमलता, दिव्यो भालः, कमले इव नयने, शुकस्य चञ्चुरिव नासिका, चन्द्र इव सम्पूर्णं मुखमण्डलम्। यदा मुखव्यादानं कृत्वा कञ्चिच्छब्दं करोति तदा 'हरिः ओ३म् तत्सत्' इव श्रूयते। मातुर्मुखं ध्यानेन पश्यति।

हिरण्यकशिपुरुवाच–एवञ्चेद्धन्तव्योऽयं शिशुः। नाऽयं दैत्यकुलभूषणो भविताऽपित्वयं दैत्यकुलसंहारक इव प्रतीयते। नाऽयं पालनीयः वर्धनीयः स्पृहणीयः स्नेह्यश्च। शीघ्रं किमपि घातकं तरलं विषमस्य रसनायां निधाय शिशुमेनं जहि, अन्यथा त्वामेव हनिष्यामि। वद, शिशोरस्य जनयित्री महाराज्ञी किं कथयति?

दासी–प्रभो, क्रोधं मा करोतु, या जननी सा किं कथयिष्यति? सा स्नेहेन स्निग्धाऽस्ति। निर्निमेषाभ्यां नयनाभ्यां पुत्राऽऽननं पश्यति। पयोधरस्य पयः पाययति। क्रोडं निधाय ग्रीवां मेलयति। न जाने किं किं गायति? पुनः शान्तो भूत्वा शिशुं सम्बोध्य कथयति–पुत्र, मैवं कुरुष्व, दिव्यतां मा प्रदर्शय। देवत्वं मा दर्शय, अलौकिकताञ्च माऽवलोकय। एतादृशं चरित्रं तव पित्रे न रोचते। पितुः प्रसन्नतैव पुत्रस्य कर्तव्यम्। पिता यथा कथयिष्यति तदेवाऽऽचरितव्यं भविष्यति। पुनः महाराज्ञी मां कथितवती–त्वया स्वामी निवेदनीयः–यद्यपि शिशुरयं वंशविरुद्धमाचरति। भवतः सिद्धान्तविरुद्धमाचरिष्यतीति प्रतीयते तथाप्यहमेनं शिक्षयिष्यामि, भवतोऽनुकूलं करिष्यामि। अतः शान्तचित्ततया भवता प्रतीक्षा कर्तव्या।

दैत्यराजेनोक्तम्–दासि, अन्तःपुरं प्रविश। महाराज्ञीं निवेदय–पुत्राय दैत्यसंस्कारं देहि, अन्यथा तं शिशुं हनिष्यामि। स्वकुलसंस्कारहीनात् पुत्रात् निष्पुत्रत्वं वरम्।

इत्थं पुत्रस्य सम्बन्धे विविधा वार्ताः श्रुत्वा दैत्यराजो व्यग्रमना जीवनं



यापयति स्म। हृदि नोत्साह उत्पद्यते स्म। पुत्रनिधनशोकं सोढुमिच्छा जागर्ति स्म। पुत्रः कथं म्रियेत इति विचारणाऽहर्निशं प्रेरयति स्म। किन्तु, पुत्रस्य जननी तमाश्वासयति स्म यत् पुत्रो दैत्यसंस्कारान् ग्रहीष्यति। अनेन षण्मासा निरगच्छन्। पुत्रमुखाऽवलोकनस्य दिनमागतम्।

विविधवाद्यध्वनिभिरन्तःपुरं परिपूर्णम्। नृत्यगानादिभिरन्तःपुरप्राङ्गणं परिव्याप्तम्। दैत्यराजः सर्वप्रथममद्य पुत्रमुखमवलोकयिष्यतीति वार्ता सर्वत्र व्याप्ता। परिणामतः पुत्रजन्मोत्सवस्याऽऽयोजनं जातम्।

दैत्यराजस्य राज्ये कोऽपि शाकाहारी नासीत्। अत एव मांसाहारस्य मदिरापानस्य च व्यवस्थाऽभवत्। नानाविधानां पशूनां मांसैर्भोजनालयो व्याप्तः। लशुनपलाण्डुदुर्गन्धेन भोजनालयः, नहि नहि, भक्षणालयः परिपूर्णः। मदिरामदघूर्णितलोचनाः पाककलाप्रवीणाः स्व-स्वकार्येषु संलग्नाः। एवं दैत्यकुलानुकूलं सर्वमायोजनं सम्पन्नम्।

दैत्यराजस्य पुत्रजन्मोत्सवस्य समाचारं श्रुत्वैव तस्य सर्वे हितैषिणो राजद्वारमागच्छन्। न केवलमागच्छन् अपित्वभक्ष्याण्यभक्षयन्, अपेयान्यपिबन्, अवाच्यान्यवदन्, अकार्याण्यकुर्वन्, जयतु हिरण्यकशिपुरिति चावोचन्। शुद्धाऽशुद्धविवेकरहिता वृषभरीत्यैव चलन्तः सन्तो भक्षणमकुर्वन्।

अस्यामेव स्थितौ दैत्यराजः पुत्रमुखस्यावलोकनायाऽन्तःपुरं प्राविशत्। अपराह्णकाल आसीत्। अन्तःपुरस्य प्राङ्गणं विविधाऽकृतिनारीभिर्जारीभिः परिपूर्णमासीत्। प्राङ्गणमन्तरा विशिष्टमासनं सुसज्जितमासीत्। दैत्यराजोऽङ्गरक्षकैः परिवृतः सुसज्जिते आसने उपविष्टः। तदानीं राजमहिषी पुत्रं क्रोडे निधाय दासीभिः परिवृतः प्राङ्गणं समागच्छत्। पुत्रञ्च राज्ञः क्रोडे समर्पितवती।

पुत्रमुखमवलोक्य दैत्यराजो हतप्रभोऽभवत्। यतः पुत्रस्य मुखे विलक्षणं तेज आसीत्। तत्तेजसा दैत्यराजस्य नेत्रे विलक्षणेन तेजसाऽन्धत्वमिवाऽलभताम्। यावल्लोचने मर्दयति तावत् कर्णौ 'हरिः ओ३म् तत्सत्' इत्यनेन परिपूर्णौ। इति किं शृणोमीति कथयन् यावत् कर्णौ स्पृशति तावन्मनसि विचित्र उद्वेगः प्रादुरभवत्। भयमिश्रितेन क्रोधेन पुत्रमुत्थाप्य पातयितुमैच्छत्तदा राजमहिषी पुत्रं ग्रहीतुं प्रयत्नशीलाऽभवत् अवदच्च–नाथ, मैवं करोतु, मां निष्पुत्रां मा करोतु, पुत्रवियोगेनाऽहं प्राणान् त्यक्ष्यामि। तत्रोपस्थिता दास्यः अपि दैत्यराजं करुणस्वरैः प्रार्थितवत्यः।

दैत्यराजः सुतं राजमहिष्याः क्रोडे निक्षिप्य क्रोधमुद्रया यद्ययं तव सुतोऽग्रे दैत्यकुलमर्यादामुल्लङ्घिष्यति चेदेनं हनिष्यामीति कथयन् अन्तःपुरप्राङ्गणात् बहिर्निश्चक्राम।

कालक्रमेण बालः करचरणैश्चलन् केवलं पादाभ्यां चलितुमारभत। कदापि चलति, कदाचित् स्खलति, शरीरं धूलिधूसरितं भवति, कदाचित् करतलध्वनिं कुर्वन् नृत्यति, कदाचिच्च 'हरिः ओ३म् तत्सत्' इति ध्वनिना प्राङ्गणं मुखरितं करोति। माता बाललीलामिमां दृष्ट्वा यद्यपि प्रसन्ना भवति तथापि दैत्यराजस्य स्वभावं स्मारं-स्मारं भयव्याकुला भवति पुत्रञ्चोपदिशति-पुत्र, मैवं वद, जयतु दैत्यराज इति कथयित्वा नृत्य। यदि त्वं पितरमसनुसरिष्यसि चेत् दैत्यसाम्राज्यस्य सम्राड् भविष्यसि। एवमहर्निशं सुतस्य मङ्गलकामनां कुर्वती सा खिन्ना, पुत्रस्य भाविवियोगशङ्कया शङ्किता व्यग्रचित्ता च कालं गणयति स्म।

दैत्यराजश्च पुत्रस्य प्रथमाऽवलोकानन्तरं सदा चिन्तामग्नस्तिष्ठति। यदा-कदा मित्रगोष्ठीषु स्वमनोव्यथां व्यनक्ति–कदाचिन्मया नैतादृशो बालको दृष्टः। तस्य दृष्टेरद्भुतः प्रभावः, स्मितौ विलक्षणा भीतिकारिका भङ्गिमा, भृकुट्योः सहस्राधिकचापचमत्कारः, वाचि सृष्टिसंहारको घोषः, मुष्ट्योः मुद्गर इव मारकोद्वेगः, पादयोः प्रहारपरिचायकः प्रभावश्च। किम्बहुना, प्रतीयते ममाऽयं मरणहेतुः। यद्यपि तस्य सखायः बहुविधैः उपायैः तं प्रबोधयन्ति स्म तथापि तस्य मनसि बोधो न जायते स्म।

इतो बालभक्तः प्रह्लादः कालक्रमेण विकासशीलः स्वबाललीलासु विविधं चमत्कारं प्रदर्शयन् चतुर्वर्षीयोऽभवत्। पञ्चमवर्षे प्रविश्य तु पितुर्हृदयं विविधविधाभिर्लीलाभिः पीडयितुमारब्धवान्। पीडितहृदयेन तेन दैत्यराजेन निश्चितं यत् केनाऽप्युपायेनाऽस्य कुलकलङ्कस्य निधनमावश्यकमेव नाऽनिवार्यमप्यस्ति।

इत्थं तेनैकदा राजसभायाः समायोजनमकारि। विविधयुद्धकलासु दक्षा मल्लास्त्वामन्त्रिता एव गुरुशुक्राचार्यस्याऽऽसने समुपविष्टस्तत[illegible]नः विद्यावयोवृद्धः शुक्राचार्योऽपि सादरमामन्त्रित आसीत्। सर्वे यथास्थानं समुपविष्टाः। सुरापूर्णपात्राणि सर्वे स्व-स्वमुखेष्वमेलयन्। तद्गन्धेन राजसभाया वातावरणं दुर्गन्धमयं जातम्। सर्वे मदिरामदोन्मत्ता अभवन्। तदानीं दैत्यराजो निजमनोव्यथां मन्थरेण स्वरेण व्यक्तवान्–यस्य सुवर्णशय्याशायिनो



हिरण्यकशिपोर्हृदये कदापि भयं नोत्पन्नम्, भूमण्डलस्य सर्वे भूपा यस्याऽग्रे नतमस्तकाः संजाताः, दुर्दान्ताः, दुर्मदाः दुस्साध्याश्च दानवा यस्य गदाऽऽघातेन यमलोकं ययुः करदीकृता वा बभूवुः, स एष दैत्यराजो हिरण्यकशिपुः स्वसुतस्य चमत्कृतिं दृष्ट्वा कम्पितवान् अस्ति। एवं कथयित्वा स्वपुत्रप्रभावं वर्णयामास।

दैत्यराजवचनं श्रुत्वा चकितचकिताः सभासदः अन्योन्यमवलोकयन्तः परमं विस्मयं प्राप्तवन्तः। तेष्वेको वयोवृद्धः सभासदः उत्थाय प्रोक्तवान्–राजन्, यं भवन्तमवलोक्य सिंहाः पलायन्ते, नागाः स्वफणान् निवार्य महाबिलं प्रविशन्ति। मानवानां का शक्तिः? देवा दीना इव दृश्यन्ते। यस्य पादध्वनिप्रभावेण पर्वताः प्रकम्पन्ते, तस्य दैत्यराजस्येमां दशामवलोक्य मया त्वनुभूयते यदयं पुत्रमोहोऽस्ति। यदि पुत्रः प्रभावशाली वर्तते चेद् भवतु, यदि सोऽग्रे चलित्वा स्वप्रभावं परित्यज्य दैत्यप्रभावं न ग्रहीष्यति चेद् वयं तं हनिष्यामः। मल्लेनैकेन कथितमहं पर्वतात् पातयित्वा यमलोकं प्रेषयिष्यामि। द्वितीयेन परमक्रुद्धेन मल्लेन गर्जितमहं तरङ्गाघातघातिन्या नद्या मध्ये निमज्जयिष्यामि। तृतीयेन मदिरामदमत्तेन घर्घरितकण्ठेन संकेतितं खड्गेन खण्डयिष्यामि। केनचित् विषधराणां दशनैर्यमलोकं प्रापयिष्यामीति गदितम्। कश्चित्तु मदमत्तगजदन्तैर्विदार्य मृत्युमुखं प्रापयिष्यामीति कथितवान्। कोऽपि सोत्साहो भणितवान्–अतितप्तपवनप्रभावेण तापयित्वा मारयिष्यामि। सर्वेषामेतेषां मल्लानां जल्पितानि श्रुत्वा विद्यावयोवृद्धेन शुक्राचार्येण शान्तस्वरेण प्रभावकारिणा वचनेन निगदितम्–अहन्तु स्वाश्रमं नीत्वा, स्वज्ञानप्रभावेण दैत्यसंस्कारयुक्तं विधाय भवतोऽनुकूलं करिष्यामि। तस्य विद्यावयोवृद्धस्य गुरोः शुक्राचार्यपदसमासीनस्य सभासदः मन्त्रणां श्रुत्वा दैत्यराजेन स्वीकृतं कथितञ्च पञ्चवर्षीयः पुत्र आश्रमं गत्वा भवतो ज्ञानं प्राप्स्यति। एवं विचार्य सभा विसर्जिता।

लेखनि, त्वं पुनरन्तःपुरं प्रविश। प्रकृष्टो ह्लादो यस्मिन् यस्य वा सः प्रह्लादः हिरण्यकशिपुसुतः कालक्रमेण यथा-यथाऽवर्धत तथा-तथा तस्य विविधा बाललीलाऽप्यवर्धत। यदा स त्रिवर्षीयो जातस्तदानीं स दासीपुत्रैर्दैत्यपुत्रैश्च साकं विविधां बाललीलां प्रारब्धवान्। कदाचिद् कच्छपावतारलीलाम्, कदाचिच्छूकरावतारलीलां च। प्रलयकालस्य पयोधिजले वेदानां रक्षार्थं भगवान् विष्णुर्नौकाकारं मत्स्यरूपं धृत्वा पृथ्वीं पृष्ठप्रदेशे रक्षितवान्। कच्छपरूपं धृत्वा पृथ्वीं पृष्ठप्रदेशे रक्षितवान्। शूकररूपं धृत्वा स्वबाह्यदन्तेन धरां नरकादानीतवान् इत्यादिभिर्लीलाभिः सर्वे अमोदन्त। इत्यपि संकेतं ददाति यन्नरसिंहावतारलीलान्तु

यूयं सर्वे प्रत्यक्षं द्रक्ष्यथ। एवं बाललीलां कुर्वन् पितरं हिरण्यकशिपुं विशेषरूपेण विस्मापयन् पञ्चवर्षीयो बभूव। तदानीं दैत्यराजो हिरण्यकशिपुः सुतं प्रह्लादं गुरोर्गृहे पठितुं प्रेषयामास।

गुरोर्गृहं गत्वा गुरुं प्रणम्य च प्रह्लादः पृष्टवान्—अस्मिन् चराचरपूर्णे जगति कः परात्परः? गुरुणा प्रतिपादितम्—दैत्याधिपतेर्हिरण्यकशिपोः परात्परः कोऽपि नास्ति। समस्तस्य भूतलस्य सर्वे मानवा दैत्यसंस्कृतिं स्वीकृत्य तमेव परात्परं मन्यन्ते। अस्यां संस्कृतौ कर्तव्याऽकर्तव्ययोर्विचारो न क्रियते, भक्ष्याऽभक्ष्ययोर्विचारो न विधीयते, धर्माऽधर्मयोश्चर्चा न चाल्यते, शुद्धाऽशुद्धयोर्भेदाश्च न गण्यते। अतस्त्वं पितरं भज, पितरमनुसर, पितुरुत्तराधिकारी भव, दैत्यानां राजा च भविष्यसि।

प्रह्लादोऽवदत्—गुरो, यद्यपि भवन्तो दैत्यानां गुरवः। शुक्राचार्यस्यासने उपविष्टत्वाच्छुक्राचार्यः कथ्यते, दैत्यशासनस्य राजनीतेर्वैशिष्ट्यप्रतिपादनत्वात् राजनीतिज्ञा मन्यन्ते, तस्यैव शासनस्याऽर्थशास्त्रज्ञत्वादर्थशास्त्रिणः स्वीक्रियन्ते, तस्यैव समाजव्यवस्थाया विशेषज्ञत्वात् समाजशास्त्रज्ञा विज्ञायन्ते, तस्यैव शिक्षाशास्त्रमर्मज्ञत्वात् शिक्षाशास्त्रिणश्च निष्पद्यन्ते, तथापीश्वरीय-संविधानस्याऽज्ञत्वाद् वस्तुतत्त्वज्ञा न सन्ति। सर्वं विष्णुमयमिति न जानन्ति, 'हरिः ओ३म् तत्सत्' इत्यस्याऽभिप्रायं न विदन्ति। अतो मां शिक्षयितुं न समर्थाः भवन्तः। बालभक्तस्य प्रह्लादस्य सर्वज्ञतां विज्ञाय गुरुर्विचारसागरे मग्नः।

गुरोराश्रमे वसन् प्रह्लादः कदाचित् सर्वान् दैत्यबालकान् समेत्य वैष्णवधर्मस्य रहस्यं प्रतिपादयति, कदाचिद् विष्णुना व्याप्तं जगदिति प्रदर्शयति, 'हरिः ओ३म् तत्सत्' इत्यस्य महिमानं निरूपयति, 'ओ३म् नमो भगवते वासुदेवाय' इति मन्त्रजपस्य साधनाञ्च शिक्षयति। इत्थं शासनविरुद्धं सर्वं कार्यं कर्तुं निर्दिशति।

गुरुः प्रह्लादोपरि स्वोपदेशस्य निरर्थकतां विज्ञाय कस्मिँश्चिद्दिवसे अपराह्णे प्रह्लादमादाय हिरण्यकशिपोः राजभवनं प्रत्यचलत्। मार्गे गुरुः कथयति—प्रह्लाद, 'जयतु दैत्याधिपतिः' इति कथयन् चल। किन्तु, प्रह्लादः 'हरिः ओ३म् तत्सत्' इति वदन् चलति, यदा-कदा 'ओ३म् नमो विष्णवे,' इत्युच्चारयन् व्रजति, कदाचिच्च 'ओ३म् नमो भगवते वासुदेवाय' इत्युद्घोषं कुर्वन् द्रुतं याति।



गुरुः स्वोपदेशस्य निरर्थकतां विज्ञाय चिन्तयति—अद्य न जाने कोऽनर्थः भविष्यति? मार्गमुभयतोऽमङ्गलकराणि दृश्यान्येव दृश्यन्ते स्म। क्वचिच्छृगालो विचित्रेण स्वरेण रौति, क्वचित् काकः कर्कशेन स्वरेण क्रन्दति, क्वचिद् विडाला विलपन्ति, क्वचिच्च नागा नकुलाऽऽक्रमणभयाद् वायुवेगेन पलायन्ते। किन्तु, निर्भयः प्रह्लादः 'हरिः ओ३म् तत्सत्' इति जपन् गुरुमनुसरति।

अपराह्णे यदा दैत्यराजो हिरण्यकशिपुः एकाकी चिन्तयति स्म तदा गुरुणा सह प्रह्लादो राजभवनं प्राविशत्। 'हरिः ओ३म् तत्सत्' इत्युद्घोषं कुर्वन् पितरं ननाम। पुत्रस्य पूर्ववदाचरणं दृष्ट्वा दैत्यराजो विद्यावयोवृद्धं गुरुं पप्रच्छ—किमियमेव भवदीया शिक्षा? गुरुरवदत्—दैत्यराज, बालकेऽस्मिन् मम सम्पूर्णा शिक्षा निष्फला जाता। न केवलमित्येवाऽपितु विद्यालयस्य सर्वे बालका अस्यैवाऽनुसरणं कुर्वन्ति। अत एषोऽहमसफलो भूत्वा भवतः पुत्रं परावर्तयितुमागतोऽस्मि। अलौकिकी चास्य क्षमता। प्रतीयते यद्ययं ममाऽऽश्रमे स्थास्यति तदा मम बुद्धिमपि परावर्तयिष्यति। अतोऽस्य सम्बन्धे भवते यदुपायो रोचते स एव भवता करणीय इति।

गुरोर्वचनं श्रुत्वा दैत्यराजस्तं सुतमन्तःपुरं प्रेषयित्वा चातीव चिन्तामग्नोऽभवत्। चिन्ताकातरवदनः स पुत्रबधाय कृतसंकल्पोऽभवत्। राजसभायाः तं सदस्यमस्मरत् येन कथितमासीदेतं पर्वतशिखरान्निपात्य हनिष्यामि। स्मरणमात्रेण स सदस्यः समुपस्थितोऽभूदपृच्छच्च—काऽऽज्ञा? कः आदेशः? किं कष्टम्? का चिन्ता? किमर्थं मम स्मरणम्?

दैत्यराजेनोक्तम्—सुतोऽसौ प्रह्लादो गुरोरुपदेशान् नाङ्गीकृतवान्। न केवलं दैत्यबालकान् अपितु स्ववक्तव्येन स्वाऽऽचरणेन च गुरुमपि प्रभावितवान्। अतो गुरुः पुत्रमानीय समर्पितवान् कथितवाञ्च—यद्ययं भूतले स्थास्यति चेद् दैत्यसंस्कृतिरेव समाप्ता भविष्यति।

दैत्यराजस्य वचनमाकर्ण्य तेन दैत्यमल्लेन प्रतिज्ञातम्—श्वः दैत्यबालैः सह पर्वतारोहण-भ्रमणादिक्रीडया पर्वतान्निपात्य निश्चयरूपेणैनं हनिष्यामि नोचेद् भवतः सभायाः सदस्यतां त्यक्ष्यामीति कथयित्वा स्वनिवासभूमिं ययौ।

दिवासाऽवसानस्य समयः समागतः। दैत्यराजस्य मल्लस्य च मन्त्रणां श्रुत्वा दिनकरः क्रोधेन रक्तवर्णो जातः। जले, स्थले, पर्वतशिखरे, वृक्षाणां शिखासु च स प्रभावः परिलक्षितोऽभवत्। एवं शनैः शनैः सूर्योऽस्ताचलस्य पारमगच्छत्। सन्ध्याऽपि दैत्यराजस्य कुमन्त्रणया कुपिता शीघ्रमेव रात्रेः शरणं

गता। रात्रिः समागता, किन्तु साऽपि रुदती तुषारबिन्दुरूपेणाश्रुबिन्दून् पातयन्ती समागता। चन्द्रस्तारकाश्च दैत्यराजस्य कुकृत्यं कल्पयन्तस्तुषारान्धकारेण म्लानमुखाः समागताः। मदिरामदमत्तोऽपि दैत्यराजो रात्रौ निद्रां न लेभे।

कालस्य गतिशीलत्वात् रात्रिः समाप्ता । प्रातःकालः समागतः। सूर्योऽन्धकारं नाशयनुदयगिरिमारुरोह। निद्रां विहाय सर्वे प्राणिनः स्व-स्व-कार्येषु संलग्नाः। किन्तु, तमोगुणगर्तगता निद्रालसा दैत्यास्तु जृम्भन्ते स्म। शनैः शनैः दिनमवर्धत। तदानीं दैत्या अपि जागरितवन्तः। यथा-तथा नित्यक्रियां समाप्य, अभक्ष्यान् भक्षयन्तः, अपेयान् पिबन्तः अकार्येषु कार्यरता अभवन्। एवं पूर्वाह्णस्य पश्चान्मध्याह्नस्तदनन्तरमपराह्णोऽपि समागतः।

पूर्वनिश्चयाऽनुसारं बालभक्तस्य प्रह्लादस्य वधाय कृतनिश्चयो मल्लो दैत्यबालैः सह पर्वताऽऽरोहणविहरणकृत्यसम्पादनार्थं प्रह्लादमानेतुं राजद्वारमागच्छत् । दैत्यराजेन प्राप्तसङ्केतः कश्चिद् भृत्योऽन्तःपुरात् प्रह्लादमानीय प्राणघातेच्छुकाय मल्लाय समर्पितवान्।

दैत्यराजस्य राजधान्या नातिदूरे एकोऽत्युन्नतो गव्यूतिद्वयविस्तृतो लतावृक्षादिभिर्मण्डितो झर्झरध्वनिध्वनितनिर्झराऽन्वितो व्याघ्रसिंह-शृगालव्यालादिपूर्णगहनगुहाभिर्मण्डितश्चैकः पर्वत आसीत्। तस्मिन्नारोहणार्थं परमरमणीयानि सोपानान्यासन्।

मल्लोऽपि स दैत्यबालैः सह प्रह्लादमादाय पर्वताऽरोहणं प्रारब्धवान्। जयतु दैत्यराजो हिरण्यकशिपुरित्युच्चारयन्तः दैत्यबालाः गिरिसोपानान्यारोहन्ति स्म। किन्तु, प्रह्लादो जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमण्डले इति जपन्, विष्णोः सर्वव्यापकतामुद्घाटयन् यदा-कदा 'हरिः ओ३म् तत्सत्' इत्युच्चारयन् सोपानेषु पादौ स्थापयन् पर्वतमारोहति स्म।

एवं पर्वतस्य प्रशस्ततलं सर्वे समागच्छन्। दैत्यबाला विविधाः क्रीडाः कुर्वन्ति स्म। प्रह्लादोऽपि तेषां दैत्यबालानां मध्ये स्वप्रभावं प्रकटयति स्म। यदा कदाचित् स 'ओ३म् नमो विष्णवे' इति कथयित्वा सुदूरमुत्पतति स्म। यदा वृक्षान् मधुराणि फलानि याचते स्म तदा वृक्षाः स्वयं फलानि ददति स्म। कदाचित् कमपि वन्यपशुं 'शान्तो भव' इति कथयित्वा शान्तं करोति स्म। कदाचित् कस्याऽपि दैत्यबालस्य मस्तके हस्तं धृत्वा ध्यानमग्नं कारयति स्म। कदाचिन्मल्लस्य दिशि दृष्ट्वा तस्य हृदि क्षणं वैष्णवरूपं दर्शयति स्म। एवं पर्वतविहरणलीला चलति स्म।



मल्लेन मनसि विचारितम्—अद्भुतोऽयं बालकः। अस्मिन्नदृष्टपूर्वा शक्तिर्दृश्यते, अश्रुतपूर्वा प्रतिभा परिलक्ष्यते। दैत्यकुलेऽयमभूतपूर्वो बालको विद्यते। किं पर्वतात् पातनेनाऽप्ययं मरिष्यति? अस्य वधाय कृतसंकल्पोऽहम्। किं कुर्यां किं न कुर्यामिति चिन्तयन् स पर्वतस्यैकं तटं समागच्छत्।

तत्र दैत्यबालैः सह क्रीडन्तं प्रह्लादं हस्ताभ्यां धृत्वा पर्वतादधोऽपातयत्। तत्रैकश्चमत्कारोऽभवत्। धराया अन्तरालादेका नारीमूर्तिः प्रादुर्भूय तं पतन्तं स्वोत्सङ्गेऽरक्षत्। किन्त्विदं दृश्यं दृष्ट्वाऽपि मल्लो नेत्रयोर्भ्रमं मत्वा दैत्यबालैः सह सोपानमार्गेणाऽवतीर्य राजधानीं प्राविशत्।

यदा स मल्लो राजधानीं प्राविशत् तदा पश्यति प्रह्लादो अन्यैर्दैत्यबालैः सह क्रीडति। न केवलं क्रीडत्यपितु 'सर्वं विष्णुमयं जगत्' इत्यस्य वाक्यस्य व्याख्यां करोति, ध्यानस्य महिमानं वर्णयति, जगतो निःसारतां च निरूपयति।

परमं विस्मितं सुतस्याऽलौकिकतां चिन्तयन्तञ्च दैत्यराजं मल्लोऽवदत्—महाराज, असाधारणोऽयं बालकः, असामान्याऽस्य योग्यता, अद्भुतमस्य प्रत्युत्पन्नमतित्वम्, अस्य नेत्रयोर्विलक्षणा प्रभावकारिणी शक्तिः सुमधुरमस्य वाक्पटुत्वम्। मयाऽनुमीयते नेमं कोऽपि हन्तुं शक्ष्यति।

येन दैत्यराजेन कदाचिदपि कस्यायामपि स्थितौ कातरता न प्रदर्शिता, तेन दैत्यराजेन कातरेण स्वरेण निगदितम्—अरे मल्ल, याहि त्वं निजनिवासस्थानम्। अन्यान्यानुपायान् कृत्वाऽपि यदि निष्फलो भविष्यामि चेदहं स्वहस्तेनैवैनं मृत्युमुखं प्रापयिष्यामि। पुत्रवधस्य लोकनिन्दामपि सहिष्ये।

म्लानमुखो मल्लस्तु स्वनिवासभवनं प्राप्तवानेव दैत्यबाला अपि स्व-स्व-गृहं ययुः।

रहसि चिन्तामग्नो दैव्यराजः सहसा स्मृतवान्—कल्लोलिन्याम्, वीचिविलासिन्याम्, आवर्ताऽऽघातघातिन्यां तस्यां नद्यां नौकाविहारव्याजेनैनं ब्रुडयेयम्। सहसा नौकाविहारकलितकलादक्षो दुर्मुखो नाम दैत्यः स्मृतिपथमागच्छत्। स्मृतिमात्रेण च स दैत्यो हिरण्यकशिपोः समक्षमुपस्थितो भूत्वा नतशिरा अपृच्छत्—महाराज, कथमयं तुच्छः स्मृतः? किं कर्म? श्रुतमात्रेणाऽऽदेशं पालयिष्यामि।

दैत्यराजेनोक्तम्—दुर्मुख! एतत् सर्वविदितमस्ति यत् सम्प्रति दैत्यसंस्कारहीनस्य कुपुत्रस्य ममेच्छाविरुद्धाऽऽचरणेन पीडितोऽस्मि। तस्मिन्

गुरूपदेशो निष्फलः, पर्वतपातनषड्यन्त्रश्च विफलः। किं नौकाविहारव्याजेन तस्या आवर्ताऽऽघातघातिन्या नद्या मध्ये नीत्वा कुपुत्रं ब्रुडयिष्यसि?

दुर्मुखेनोक्तम्–अस्माकं दैत्यसंस्कृत्यां किं कर्म ? किं कुकर्म? इति विचारणा न क्रियते तथापि न जाने कथं सुपुत्रस्य कुपुत्रस्य वा वधस्येच्छा मह्यं न रोचते।

दैत्यराजेन कथितम्–दुर्मुख, त्वया मम हृदयस्य भावो ज्ञातः। इदमेव कारणमस्ति यदद्यावधि स जीवति नोचेत् पूर्वमेव मया हतोऽभविष्यत्। यदि मम प्रच्छन्नविविधोपायाः सफला न भविष्यन्ति चेदहमेनं स्वहस्तेन हनिष्यामि। त्वं ममाऽऽज्ञया तं तस्यां नद्यां निमज्जय।

श्वः करिष्यामीति कथयित्वा नतशिराश्च भूत्वा दुर्मुखो निजनिवासनिकेतनं गतः।

गतिशीलः कालः स्वगत्या चलन्नासीत्। दिवसः समाप्तः, सन्ध्या समागता, साऽपि निरगच्छत्। रजन्या रञ्जितो जातो राजभवनस्य परिवेशः। साऽपि रजनी न स्थिता। प्रातरागच्छत्, सोऽपि गतः इमां परिवर्तनशीलतामवलोक्याऽपि दैत्यराजो न ज्ञातवान् यद् यातायातयुक्तेऽस्मिन् संसरणशीले संसारेऽअहमेव कथं स्थास्यामि ? स तु नौकाविहारार्थं प्रह्लादस्य गमनवेलां प्रतीक्षते स्म। सा वेलाऽपि समागता। स पुत्रं तरणीतरङ्गताण्डवाय समर्पयितुं दुर्मुखाय समर्पितवान्।

स च दैत्यो प्रह्लादेन दैत्यबालैश्च सहाऽऽवर्ताऽऽघातघातिन्यास्तटं गत्वाऽतिविशालां तरणीमारुह्य नौकाविहारमारभत। सर्वे दैत्यबाला अट्टहासं कुर्वन्तः करतलध्वनिमकुर्वन्। प्रह्लादस्तु मौनमाकलय्य ध्यानमग्नोऽभवत्। 'हरिः ओ३म् तत्सत्' इति मन्त्रस्य जपमारब्धवान्। कदापि 'आ३म् नमो विष्णवे' इत्युच्चारितवान्, कदाचित् 'ओ३म् नमो भगवते वासुदेवाय' इत्यवोचत्। दैत्यधीवरा ध्यानस्थं प्रह्लादं वीक्ष्य चकितचकिता आसन्। प्रह्लादस्य निमज्जनाय कृतसंकल्पो दैत्यः प्रह्लादस्य दिशि दृष्टिनिक्षेपेणापि कम्पमान आसीत्। यदा-कदा तस्य हृदि सशङ्खचक्रो हरिर्दृश्यते स्म। दैत्यबाला अपि कदाचित् प्रह्लादमवलोक्य भयभीता भवन्ति स्म। कदाचिच्च विचित्राऽऽनन्दानुभूतिं लभन्ते स्म। इत्यवस्थायामेव नौका नदीमध्यगताऽभवत्। तत्रोत्थिततरङ्गाघातैस्तरणी दोलायमानाऽऽसीत्। प्रह्लादं नद्या जले निमज्जयितुं कृतसंकल्पो दैत्यः सहसा प्रह्लादमुत्थाप्य वेगवत्या नद्या वीचिमध्यनिर्मितेष्वावर्तेषु प्राक्षिपत्। प्रक्षिप्य च



यदा स क्रूरः कौणपः आवर्तान् पश्यति तदा तस्य नेत्रयोर्दिव्या दृष्टिरुत्पन्ना, दृष्टं च तेन– एका दिव्याऽऽकृतिरदृष्टपूर्वा नारी तं प्रह्लादं स्वक्रोडे निधाय तरङ्गैः सह क्रीडन्ती नद्यास्तटमागच्छत्। पुनस्त्वरितमेव निजदृष्टिदोषं मत्वा नौकया परावर्त्य नदीतटमागत्य दैत्यबालैः सह राजधानीं प्राप्नोत्। किन्तु, प्रह्लादस्तु पूर्वमेव राजधानीं प्राप्तवानासीत्।

प्रह्लादस्य जलसमाधिदानाय कृतसंकल्पो दुर्दान्तदानवो दैत्यराजं निकषा गत्वा न्यवेदयत्–महाराज, प्रह्लादः काचन परात्परा शक्तिः। केनापि मारणेन न मृत्युं प्राप्स्यति। काचित् मानवी शक्तिरेनं त्रायते। अहन्तु निजदृष्टिदोषं मन्यमान आसम्। किन्त्वयमस्मत् पूर्वमेव राजधानीं प्राप्तवानासीत्। मम विचारेणेमं वह्निज्वालायां समर्प्यैव भवता निश्चिन्तता लप्स्यते। इति निवेद्य क्षमां याचमानः स स्वविलासभवनं जगाम।

हिरण्यकशिपोश्च मनश्चिन्ताचक्रमारुह्य नृत्यति स्म। कदाचित्तु मनसि शङ्कोत्पद्यते यद् बालकस्य प्रभावेण प्रभाविता एते क्रूरा अपि दैत्या तं हन्तुं प्रयत्नशीला न भवन्ति। किमहमेनं स्वहस्तेन हनानि? मम मनस्यपि सम्भवतो ममत्वमवशिष्टं वर्तते। किं कुर्याम्? किं न कुर्याम्? संसारस्य कोऽपि मोहो मां स्वपाशे न बध्नाति, पुत्रमोहो मां कथं बाधते ? स्वकरेणास्य वधस्येच्छा कथं नोत्पद्यते? किमयमेव पुत्रमोहः कथ्यते। यद्यस्य वधस्योपायो मया त्यज्यताञ्चेद् दैत्यसंस्कृतिरेव नष्टा भविष्यति। यतो बालोऽप्ययमेतादृशं चमत्कारं प्रदर्शयति। यदि किशोरः कुमारी युवा च भविष्यति तदा किं किं करिष्यतीति नाऽवगम्यते। अतोऽस्य वधस्तु करणीय एव। किं स्वहस्तेन? इयमेव चिन्ता विकलीकरोति मे मनः। पर्वतात् पातनेन न मृतः, आवर्ते पतितोऽपि रक्षितो जातः । तत्किं कुर्याम्? पुनः स्मृतं तेन यद् दुर्मुखेन कथितम्– अग्नये समर्पणेनाऽस्य विनाशो भविष्यति। सहसा स्मृतिर्लब्धा–मम भगिनी 'होलिका' तपस्तप्त्वा शिवं साक्षात्कृत्य शीतलं चीरं प्राप्तवती विद्यते। सा शीतलस्य चीरस्य प्रभावेणाऽग्नेर्ज्वालायामपि न ज्वलति। किं सा शीतलेन चीरेण स्वशरीरमाच्छाद्य प्रह्लादं क्रोडे निधाय, अग्नौ प्रविश्य, पुनः प्रह्लादमग्नौ निक्षिप्य बहिरागमिष्यति? यद्यपि साऽपि ममेच्छाविरुद्धमाचरति। तमोगुणे राज्ये सतोगुणमाचरति। मांसभक्षणं न करोति, मदिराञ्च न पिबति। फलानि भुङ्क्ते, गोदुग्धं गृह्णाति, लशुनं पलाण्डुञ्चापि दृष्ट्वा नासिकाछिद्रे पिहिते करोति। सर्वे मां भजन्ति, किन्तु सा शिवं भजति, तथापि तां कथयिष्यामि। बलेन, छलेन, येन विधिना

सा ममाऽनुकूला भविष्यति, तदेव करिष्यामीति निश्चित्य रात्रौ विश्राममकरोत्।

द्वितीयो दिवसः समागतः। दैत्यराजो भगिनीं होलिकामाह्वयत्। सा च विनम्रतया समागत्याऽग्रजं ननाम, पुनः पृष्टवती—किमर्थमाहूताऽस्मि? क आदेशः? आज्ञा च का?

दैत्यराजेनोक्तम्—भगिनि, त्वं जानासि यत् पुत्रस्य प्रह्लादस्य प्रभावेण दैत्यसंस्कृतिर्दूषितेव लक्ष्यते। सोऽहर्निशं परात्परं कमपि विष्णुं जपति। यदा-कदा विष्णोः प्रभावं वर्णयति । न केवलं वर्णयत्यपितु दर्शयति। तस्यायं व्यवहारः मह्यं न रोचते। यद्यपि त्वमपि शिवस्य भक्ताऽसि, शिवं जपसि, तपस्तप्त्वा शीतलं चीरं प्राप्तवत्यसि, दैत्यभोजनं न करोषि, तथापि दैत्यसंस्कृतेर्विरोधं न करोषि। स्वप्रभावेण कमपि न प्रभावयसि, शान्तया निवससि। तव व्यवहारेण तादृशं कष्टं नोत्पद्यते, यादृशं कष्टं पञ्चवर्षीयस्य सुतस्य व्यवहारेण। अतः सुतस्य वधस्याऽऽवश्यकता वर्तते। अस्या आवश्यकतायाः पूर्तिस्त्वयैव करणीयाऽस्ति। भमाऽऽदेशं श्रुत्वा त्वया 'ननु न च' न कर्तव्यम्। अद्य सूर्यास्तस्याऽनन्तरं कदाचिद् बृहदाकारे प्रज्वलितेऽग्नौ शीतलेन चीरेण स्वशरीरमाच्छाद्य क्रोडे च प्रह्लादमादाय त्वं प्रवेक्ष्यसि प्रह्लादञ्च तस्मिन्निक्षिप्य बहिरागमिष्यसि । इयमेव ममाऽऽज्ञा, अयमेव ममाऽऽदेशः । ममाऽऽदेशस्याऽवहेलना त्वया न कर्तव्या।

होलिकया निजाग्रजस्याऽऽज्ञामादेशञ्च श्रुत्वा परमविस्मितैव न, अपित्वन्तर्द्वन्द्वस्य स्थितिः प्राप्ता—यद्याज्ञां न स्वीकरोमि चेन्मां हनिष्यति, यद्यादेशं न पालयिष्यामि चेन्निरपराधस्य बालभक्तस्य परात्परस्य विष्णोरुपासकस्य वधस्य जघन्याऽपराधो भविष्यति। तर्हि किं कुर्याम्, किं न कुर्याम्? इति मार्गदर्शनं ममेष्टदेवो भगवान् शिव एव करिष्यति। मनसि शिवं ध्यात्वा प्रार्थितवती—प्रभो, मार्गं दर्शय। सहसा मार्गदर्शनं जातम्—स्वशरीरं दग्ध्वाऽपि प्रह्लादं रक्ष। इति चिन्तयित्वा सा स्वीकृतवती—आम्, अग्रजस्य भवत आज्ञां पालयिष्यामि।

होलिकया सह प्रह्लादस्याऽग्निज्वालायां प्रवेशस्य घोषणाभवत् ।

नगरस्यैकस्मिन् भागे चेन्धनानामेकीकरणं प्रारब्धम्। दैत्याधिपतेराज्ञया नगरस्य दैत्या दैत्यबालाश्च तस्मिन् कार्ये संलग्नाः। एवं सन्ध्या समायाता गता च। रात्रिः समायाता। अर्द्धरात्रावेवाऽग्निदाहस्य समयो निश्चित आसीत्



यथासमयमग्निदाहोऽभवत्। यदाऽनलः प्रज्वलितोऽभवत्तदानीं वेगेन पवनोऽप्यचलत् । वह्निज्वाला नभोऽचुम्बत् । तदानीमेव होलिका प्रह्लादं क्रोडे निधाय शीतलेन चीरेण स्वस्य प्रह्लादस्य च शरीरमाच्छाद्य प्रज्वलितेऽग्नौ प्राविशत्। जाज्वल्यमानेऽग्नौ प्रविश्य होलिका शम्भुना दत्तेन शीतलेन चीरेण प्रह्लादमाच्छाद्य स्वयं भस्मीभूता जाता। दैत्यराजो ज्वलन्तीं होलिकां दृष्ट्वा प्रह्लादस्य दशां ज्ञातुमुत्सुकोऽभवत्। किन्तु, प्रह्लादस्तु शीतलेन चीरेणाऽऽच्छादितशरीरोऽग्नेर्बहिर्निर्गतः। तत्क्षणं 'ओ३म् नमः शिवाय', 'ओ३म् नमो विष्णवे' इत्यस्य नादोऽगुञ्जत्। सर्वे चकितचकितास्त्वाऽऽसन्नेव हिरण्यकशिपुस्तु होलिकादहनस्य मूलकारणमात्मानं मत्वा मनसा पीडितोऽपि जातः। पुनर्निर्णयमपि कृतवान्—प्रह्लादहननस्य सर्वे प्रयत्ना विफला भवन्ति चेदहं स्वयमेवैनं हनिष्यामि।

होलिका त्वात्मविसर्जनं प्रह्लादस्य च रक्षणं कृत्वा प्रातः-स्मरणीयाऽभवत्। तस्मादेव कालादद्यावधि होलिकादहनस्य रूपेण फाल्गुन-पूर्णिमायां तस्याः पुण्यतिथिरायोज्यते। श्रद्धया च सा स्मर्यते। बालभक्तस्य रक्षार्थं यद्बलिदानं सा कृतवती तदविस्मरणीयमेव। अत एव लोकैरिदं गीतं गीयते—

होलिके, यत्त्वया सर्वथा साधितम्,
क्वापि नाद्यावधि कैरपि तत्कृतम्।
भक्तरक्षार्थमेवाऽवतारस्तव,
भक्तभक्त्यर्थमेवाऽवतारस्तव।
वन्दनीयाऽसि त्वं पूजनीयाऽसि त्वम्,
माननीयाऽसि त्वं प्रार्थनीयाऽसि त्वम्।
तव च पुण्यातिथिः फाल्गुनी पूर्णिमा,
यत्र पूर्णः शशी यस्य च श्वेतिमा।
दग्धा च याऽप्यदग्धा त्वं ययौ,
मृत्वाऽपि या चामरत्वं ययौ।

स्वपुत्रस्य प्रह्लादस्य वधं स्वयं करिष्यामीति कृतसंकल्पो दैत्यराजो हिरण्यकशिपुरहर्निशं व्यग्रस्तिष्ठति स्म। यद्यपि स्वहस्तेन पुत्रवधस्य लाञ्छनया लाञ्छितो भविष्यामि तथापि नान्यः कश्चिदुपायोऽवशिष्यते। स्मयमानम्, क्रीडन्तं बाललीलया च सर्वान् मुग्धान् कुर्वन्तं सुतं हन्तुं मे शस्त्राणि साहाय्यं

कर्तुं नेच्छन्ति। किन्तु, तत्कालमेव तस्य हननं न स्यात्तर्हि न जाने बालोऽयं किशोरस्तरुणश्च भूत्वा किं किं करिष्यति? एतस्यामवस्थायामेव तु बाललीलाप्रसङ्गेनैव सर्वान् सहचरान् प्रभावयति। कदाचिद् विष्णोश्चमत्कारं दर्शयति, कदाचित् सर्वान् ध्यानमग्नान् कृत्वा तेषां बहिर्मुखत्वं निवारयति। स्वप्रभावेण दैत्यसंस्कृतेः निरर्थकत्वं साधयति। अतएवाऽहं नाऽधिकं प्रतीक्षिष्ये। स्वहस्तखड्गेन खण्डयाम्येनम्। इति निर्णयं कृत्वा राजभवनस्य द्वारदेशे प्रतीक्षते स्म।

राजभवनस्य द्वारप्रदेशे प्रह्लादं प्रतीक्षमाणं चिन्तामग्नं दैत्यराजं हिरण्यकशिपुं ज्ञात्वा दैत्यराजस्य राजधान्याश्चक्रापुर्याः कतिपया दैत्यराजस्य हितैषिणो भयप्रदाऽऽकृतिनो दैत्यवीरास्तत्राऽऽगच्छन् प्रोचुश्च—दैत्यराज, भवतो व्यग्रतामनुभूय सेवार्थं वयमागता आस्म। किं भवतः कार्ये वयं सहायका न भविष्यामः? तेष्वेकोऽवदत्—अहं मदोन्मत्तानां गजानां दन्तप्रहारैस्त्वं भवद्विरोधिनम्, दैत्यसंस्कृतिसंहारकारकम्, विविधचमत्कारप्रदर्शकञ्च बालं प्रह्लादं संहारयिष्यामि। मम प्रशिक्षिता हस्तिनः कदाचिदप्यसफला न भवन्ति। अतो मह्यमाज्ञां यच्छतु।

तेषु दैत्यवीरेषु द्वितीयोऽवदत्—यद्ययमसफलो भविष्यति चेदहन्तु कदाचिदप्यसफलो न भविष्यामि यतोऽहं नागान् वशीकृत्य तेषां सहायतया दैत्यसंस्कृतिविरोधिनो हन्मि। भवान् तु जानात्येव यन्मम नागा यान् दशन्ति ते त्वरितमेव मृत्युमुखं प्रविशन्ति। तेषां विषधराणां विषैरद्यावधि न कोऽपि प्राणान् रक्षितवान्। तन्मह्यमाज्ञां ददातु भवान्।

तत्रोपस्थितेष्वेकः तन्त्रविद्याकुशलो दैत्योऽप्यासीत्। तेनाऽपि दैत्यराजः प्रार्थितः—प्रभो, मम तन्त्रविद्याप्रभावस्तु भवता ज्ञायते एव। अहं स्व-तन्त्रविद्यया तप्तानिलस्य प्रयोगं करोमि। तस्य तप्तवायोः प्रयोगेणाद्यावधि न कोऽपि रक्षितः। अतो मामप्याज्ञापयतु भवान्। यद्यपि प्रह्लादो भवत्पुत्रोऽस्ति। किन्तु, दैत्यसंस्कृतिसंहारकत्वाद् वध्योऽस्ति। अतोऽहं भवदाज्ञया तं यमलोकं प्रापयिष्यामि।

हिरण्यकशिपुस्तेषां प्रतिज्ञावचनमाकर्ण्य दिनत्रयस्यावधिं प्रदाय कथितवान्—युष्मासु कोऽपि सफलो भविष्यति चेन्मम महती प्रसन्नता भविष्यति। अहं निश्चिन्तो भविष्यामि। अन्यथा चिन्तया, क्रोधेन च पुत्रवधकलङ्केन कलङ्कितो भूत्वाऽपि तं खड्गेन खण्डयिष्याम्येव। इति श्रुत्वा सर्वे जग्मुः।



न केवलं दिनत्रयं गतम्, अपि तु नव दिनानि गतानि, किन्तु ते स्वेषु कार्येषु सफला नाऽभवन्। मग्नमनोरथास्ते लज्जामनुभवन्तो दैत्यराजं समयाऽऽगत्य स्वविफलतां प्रकाशितवन्तः बालभक्तस्य प्रह्लादस्याऽलौकिकताश्च निरूपितवन्तः, इत्यपि सङ्केतितवन्तश्च यत् तस्य वधाय भवानपि सफलो न भविष्यति। किन्तु हिरण्यकशिपुना संगर्ज्य कथितं यद् यूयं गच्छत। अहन्तु राजभवनद्वारदेशे स्थित्वा प्रतीक्षे यद् यदा स आगमिष्यति तदैवाऽनेन खड्गेन तं खण्डयिष्यामि। इति कथयित्वा द्वारदेशे व्यग्रतयेतस्ततः परिभ्रमति।

पुत्रवधकलङ्केन कलङ्कितो भूत्वाप्यस्मिन् द्वारप्रदेशे हनिष्यामि। नाऽन्यमुपायं चिन्तयामीति विचारयन् प्रतिदिनं परिभ्रमति।

एकस्मिन् दिने स प्रातःकालादेव तं ग्रहीतुं हन्तुञ्च प्रतीक्षारत आसीत्। कालः स्वगत्या चलन् सान्ध्यवेलारूपेण परिणतोऽभवत्। सर्वान् प्राणिनो जीवनसंग्रामे सङ्घर्षयन्, सर्वान् शिथिलान् कुर्वन्, विश्रामाय प्रेरयन् भगवान् भास्करः पश्चिमक्षितितलं स्प्रष्टुमैच्छत्। प्रतीयते स्म स्वयमपि विश्रामाय पश्चिमदिशो भवनं प्रवेष्टुमुत्सुक आसीत्। दिनं प्रायः समाप्तमासीत्। किन्तु, रात्रिरपि नागताऽऽसीत्। दैत्यराजोऽपि राजभवनस्याऽभ्यन्तरभागे न, किन्तु बहिरपि नासीत्। देहल्यामेव स्थित्वा, नोपविश्य प्रतीक्षारत आसीत्। तस्यैकस्मिन् हस्ते खण्डनकलानिपुणः चमत्कृतचन्द्रहासो द्योतते स्म। सहसा तस्य दृष्टिः दैत्यबालैः सह वार्तालापं कुर्वतः पुत्रस्य प्रह्लादस्य दिशि गतः। स दैत्यराजः सर्वान् दैत्यबालानाहूय पृष्टवान्—बालोऽयं प्रह्लादः किं वर्णयति। सर्वे दैत्यबालाः स्वरेणैकेन कथितवन्तः—अयं सम्प्रत्येव नृसिंहावतारलीलां दर्शयिष्यामीति निगदति। दैत्यराजः प्रह्लादं धृत्वाऽपृच्छत्—को नृसिंहः? कथमवतरति? कुतोऽवतरति? प्रह्लादेन प्रणम्योक्तम्—नृसिंहो विष्णुः। अधर्मस्य नाशाय धर्मस्य स्थापनाय चावतरति। स सर्वत्र व्याप्तोऽस्ति। कस्मादपि स्थानादवतरति अर्थात् प्रकटो भवति। यतः सर्वं विष्णुमयं जगत्। दैत्यराजेन पृष्टम्—यदि सर्वं विष्णुमयं जगच्चेदत्र विष्णुः क्वाऽस्ति? प्रह्लादेनोक्तम्—स विष्णुर्मयि वर्तते, त्वय्यस्ति, तव हस्ते वर्तमानेऽस्मिन् खड्गे अस्ति। न केवलमित्येवाऽपितु द्वारमध्ये स्थिते बृहदाकारे स्थूले स्तम्भे अङ्गुल्या निर्देशं कृत्वा कथितवानस्मिन् स्तम्भेऽप्यस्ति। प्रह्लादस्येदं वचनं श्रुत्वा हिरण्यकशिपुः क्रोधेन गर्जन् मुष्टिकया स्तम्भं ताडयितुं प्रयत्नवान् कथितवान् यद्येतस्मात् स्तम्भाद्विष्णुर्नावतरिष्यति चेदहं त्वामनेन खड्गेन खण्डयिष्यामि। इति कथयित्वा मुष्टिकया

स्तम्भमताडयत्। तत्रत्या धरा चकम्प। स्तम्भं द्विधा विभक्तं कुर्वन् भगवान् 'नृसिंहः' –यस्य शरीरस्य निम्नार्धभागः नरस्य, निम्नार्धभागमुपरि भयानकस्य सिंहस्य रूपमासीत्–साक्षान्नरसिंहरूपेणाऽऽविर्बभूव। आविर्भूतो भगवान् नृसिंहः स्वगर्जनया हिरण्यकशिपुमर्धसंज्ञाशून्यमिव कृतवान्। सर्वे दैत्यबालाः नृसिंहलीलां पश्यन्तो विस्मयविमुग्धा इव आसन्। स्तम्भात् प्रकटितं नृसिंहं दृष्ट्वा दैत्यराजो भयभीतस्त्वभवदेव भगवतस्तेजो वीक्ष्य हतप्रभोऽपि जातः। सर्वमिदं किं भवतीति बोद्धुं नाशक्नोत्। एतस्यामेव स्थितौ दैत्यराजं धृत्वा तमुत्तानं कृत्वा स्वजघनप्रदेशे स्थापयित्वा स्वकीयौ चरणौ द्वारप्रदेशादधोभागे लम्बयित्वा देहल्यामेवोपाविशत् दैत्यराजस्तु तदानीं हतप्रभः, हतप्रज्ञः, हतोत्साहस्त्वासीदेव शरीरे शैथिल्यादङ्गान्यपि न चालयति स्म। भगवता नृसिंहेन कथितम्–त्वमस्मिन् क्षणे नभसि नाऽसि, भूमावपि न, गृहाभ्यन्तरे नासि, गृहाद् बहिरपि नासि, सम्प्रति दिवसो नास्ति, रात्रिरपि नास्ति। अतोऽस्मिन् क्षणे तव हनने कोऽपि दोषो नास्ति। ब्रह्मणः प्राप्तवरदानस्याऽत्र नोपेक्षा। इति कथयन् स्वकरकमलयोरद्भुतैस्तुङ्गनखैस्तस्य दैत्यस्योदरं हृदयञ्च विदीर्णवान्। तस्य निष्प्राणं शरीरं तत्रैव प्राक्षिपत्। भगवतो नृसिंहस्य साक्षाद्दर्शनं कृत्वा भक्तप्रह्लादो दैत्यबालैः सह स्तोतुमारभत–

विलोक्याऽद्भुतं चाद्य तव स्वरूपं
धन्या वयं दैत्यकुलोद्भवा वै।
नृसिंहरूपेण सदाऽस्मदीये
मनःप्रदेशे वस हे महात्मन् ॥1॥

तव स्वरूपं हृदि ये निधाय
गन्तव्यमार्गं सततं व्रजन्ति।
ते दैत्यलोकेऽपि निवस्य नित्यं
त्वयैव रक्ष्या नियतं भवन्ति ॥2॥

त्वमस्य संसारपयोधिमध्ये
निमज्जमानं स्वजनं विलोक्य।
विशालकाया तरणी हि भूत्वा
करोषि साध्यं निखिलं यथेच्छम् ॥3॥

अहो! महात्मन् सदयो यथाऽसि
न कोऽपि चान्यो भुवनत्रयेऽपि।



नृसिंहरूपं सुविशालमेतद्
दृष्ट्वाऽस्मदीयं सुमनः प्रसन्नम् ॥4॥

विभिन्नरूपेण हि दुष्टमुग्रं
विनाश्य त्वं भक्तजनस्य रक्षाम्।
करिष्यसे नाथ? सदा जगत्सु
वयं सदा त्वं शरणं व्रजामः ॥6॥

श्रुत्वा स्तुतिं दैत्यसुबालकानां
हरिः प्रसन्नो वचनं जगाद।
भो बालकाः! सच्चरिता भवन्तु
लोकोपकाराय प्रयत्नशीलाः ॥6॥

भक्ताश्च भूत्वा शुभकार्यदक्षा
भवन्तु नित्यं सुयशोऽभिलाषाः।
भक्ताऽग्रगण्येषु हि बालभक्तः
प्रह्लादसंज्ञो भुवनेषु रूढः ॥7॥

एवमाशीर्वचनैर्दैत्यबालान् परितोष्य नरसिंहरूपधारी भगवान् विष्णुः प्रह्लादं क्रोडे निधाय चुचुम्ब कथितवाञ्च–पुत्र प्रह्लाद, कालक्रमेण युवा भूत्वा दैत्यसंस्कृतिं विनाश्य मानवसंस्कृतिं स्थापय। यस्यां संस्कृतौ सर्वे स्वहितेन सह परहितस्यापि ध्यानं रक्षन्तु, परस्परं मिलित्वा निवसन्तु। 'परोपकारः पुण्याय पापाय परपीडनम्' इत्यस्य स्मरणं कुर्वन्तु, 'वसुधैव कुटुम्बकम्' अयं भावः सर्वेषां हृदयेषु निवसतु।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात्॥

इत्येभिर्भावैर्जगत् परिपूर्णं भवतु। इत्यभिधाय नरसिंहरूपधारी भगवान् विष्णुरन्तर्दधौ।

शुभम्

# फार्म-४

## नियमः ८ द्रष्टव्यः

| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | : आरा (विहार:) |
| 2. | प्रकाशनस्य अवधिः | : अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : डॉ० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : एवम् |
| | सङ्केतः | : संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : डॉ० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : एवम् |
| | सङ्केतः | : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्<br>प्रकाशपुरी, आरा (विहार:) |
| 5. | सम्पादकस्य नाम | : डॉ० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : एवम् |
| | सङ्केतः | : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्<br>प्रकाशपुरी, आरा (विहार:) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्<br>प्रकाशपुरी, आरा (विहार:) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति ।

ह० गोपबन्धु मिश्रः
सम्पादकः